१०३
३

103
3

अथ

ग्रन्थनामः-	"शाबरभाष्यवार्त्तिकम्"	
कर्तृनामः-	श्रीकुमारिलभट्टः	
विषयः-	पूर्वमीमांसा	

Shabar Bhashya Vartikam 820

"अथ"

"शाबरभाष्यवार्तिकम्"

१०३/३

श्रीमद्भट्टकुमारिलस्वामिविरचिते पूर्वमीमांसाशाबरभा
ष्यवार्तिके तृतीयाध्यायस्य तृतीयपादारंभः।

कुमारिलभट्टविरचितम्

103/3

६/६०।

२२ सुपव१

वा·र॰ ॥ ॥श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रुतेर्ज्ञाताधिकारस्यात्ततएवंलिंगविनियोगोर्पसंप्रतिवाक्यविनि
१ योगः प्रस्तूयते॥तत्रोदाहरणं उच्चैर्ऋचा क्रियत इत्यादिवाक्यं तत्र हि ऋक्उच्चैस्त्वं क्रियते गार्हपत्यं परेतस्त्वःशाहेतिजु
ज्ञयाद्यदियजुष्टायदित्सामत इत्यादि च·तत्र किमृग्यजुःसामशब्दैर्लक्षैःस्तोत्रपांशुत्वधर्मविधौ महाव्याहृत्यभित्रयं
वैश्वहोमविधौ च पूर्वोत्तरपदसंबंधनिरपेक्षाभिधानश्रुतिविशेनतेषामृग्यजुःसामार्थविशेनाव्यवस्थितेएवंलक्षणा
ऋगादिजातीनांग्रहणं॥उतमन्त्रब्राह्मणात्मकानां वेदानामिति॥कृतःसंशयः॥एकवाक्योपक्रमोपसंहा
रश्रुत्योर्विप्रतिपत्तेः॥उपक्रमे हि वेदाः श्रूयंते॥उपसंहारे तु ऋगादिजातानि॥तत्रयदिवोपक्रमस्थंवेदपदमवयवल ७६
क्षणार्थं॥अथवोपसंहारस्थऋगादिजातेःब्राह्मणाकसमुदायलक्षणार्थमितिसमंजसासमंजसत्वयोः
संदेहः॥सचाक्षःशर्कराश्रुतिवदान्नेयपरिहारास्यांसमर्थनीयः॥एवंतर्हितिनैवगतत्वात्नैतदारब्धव्यं नायमुपा
लंभः॥संदिग्धेषु हि वाक्यशेषस्य तत्प्रमाणमुक्तं॥इह तु न विधुद्देशवर्त्तिनामृगादिशब्दानां निःसंदिग्धमंत्रवेदा १
जात्ववचनत्वात्संदिग्धएवविधुद्देशः॥तेन व्यवधारणाकल्पनया यत्तरपक्षावधारणंकार्यमित्यारभ्यते किंप्राप्तं तद्॥

यःपूर्वपक्षन्यायेनैव वैश्वदेवाग्निश्रुतिर्वलीयस्त्वात्तज्जाताधिकारस्यैति। किंच यथा चरुद्रव्यसामान्यं क्रियावान विरुध्यते
विशेषैर्वा क्वचिच्छेषस्तैर्नैवं वेदैर्ऋगादयः। न कथंचित्तृगादिग्राह्ये नब्राह्मणं वक्तुंशक्यं शक्नोति तु वेदशब्दएकदेशे
पि वर्त्तितुं समुदायशब्दानामेकदेशेष्वप्युपलब्धेः। यथा यामस्त्रयामन्निति।। तथाचाध्येतारस्तत्रैव वृत्तानुरोधं यजुर्जते वे
दमधीमहे वेदोवर्त्ततइति। नच ब्राह्मणमधीयाना स्तु यावदंति। किंचा जातस्य हि व्यवस्था नास्ति कथमीवधारणे सं
कीर्णत्वात्तु वेदानां सर्वे तद्धर्मसंकराः। चोदिताएव काश्चित्त्रिष्वपि वेदेषु पठ्यंते तथायजुर्षि। तत्र यदि वेदस्त्वं धर्मसं
बंधहेतुस्तस्मादद्धोषेण जायते कोधर्म्मः क्रियतामित्यनाख्याता वा विकल्पश्चाश्रीयते। वेदांतरव्यपदेशस्य तु लब्धलब्धा
तज्जातपक्षेतु नैष दोषो न ह्येकस्मिन्नर्णसमूहे जातद्वयं समवैति। ज्योतिष्टोमप्रकरणं त्वेवमनुगृहीष्यते। अथ यथा वेदस्य
समस्तेष्वपि षट्काहाहीनसत्रविषयत्वाद्यावद्वेदानुसारी धर्मः प्रकरणलब्धसार्वत्रिकः स्यात्। न तु जाताधिकारो
पि वेदवज्जातस्य प्रकरणांतरेष्वपि तावत्तुल्यमेतत्। अथ प्रकृतजातानि क्रमकारणात् अव्यवस्थामावेदयन्त्येव अपि
शिष्टायावा प्रकरणे वेदस्यावधारणात्। नैतत्तुल्यं। कृतेऽप्रतिसंबंधात्तवर्तित्वात् जातंप्रकरणेष्विनः। वेदोमहासमूहत्वा

वा०त०३ त्यक्ततोन समाम्नायते॥ सर्वर्गादिसमूहेषु जातं व्यासंगि चेद्भवेत्॥ प्रक्तत्तोन समाम्नायेत तत्तत्स्वरूपेपि वेदत्वं॥ मंत्रब्राह्मणतकी
२ नां समूहे काठकादिके। वेदत्वं वर्त्तते नित्यमनेकक्रमगामिति। समूहा श्लोकवाक्यानां पेपादपदपर्वणां। ऋग्यजुःसाम
जातानि यत्नोकं तेषु संततिनः॥ यथावनादिसंघातास्त्वत्सामान्यसमन्विताः। तथर्गादिसमूहानां सामान्यं जातमुच्यते
जातिरेवात्तु यज्जातं लाघ्यकारेण वर्णितं। व्याख्यातत्त्वलिश्वृतन्नैव शृंगादेर्जात्यसंभवात्। द्विवर्णे च पदे जातिर्गोश्चद्भवेन
कल्पितं। वाक्यत्ववक्कर्थं तु स्यु ऋग्यजुःसामजातयः। यथैव द्विवाक्यत्वं नाम जाति लिंगस्थानकरणप्रयत्नाभिव्यंग्य
कमवद्वर्णात्मकपदसमूहेंत्यव्यवेवा। विलक्षणावयवपदार्थसंबंधप्रत्ययाकांक्षाव्यवधानाभ्रमणवादिभ्यायेनकल्प
यितुं तत्कृताधिकरणेनाव्यवसितं॥ तथैव ऋक्त्वयजुष्ट्वसामत्वानि क्रमवद्वर्णस्थिराश्रयाणि न श्रयानि कल्पयितुं किंवे
कार्थसमूहस्थ ऋग्यजुःसामसंज्ञितं। जातं समूहसामान्यं न जातिर्नीम काचन। यौगिकानां यथा जातिरन्यत्सामान्यमि
ष्यते। तथा समूहसामान्यं जातं जातिविलक्षणं। लोकेपि चैवैवं जातिजातशब्दार्थप्रसिद्धिरित्येवमेवव्याख्येयं॥ वेदो वाप्रा २
यदर्शनात्॥ ॥ किमिदं प्रायदर्शनादिति। नेदमन्यैः प्रायदर्शनैः कल्पमिति प्रश्नपन्नकृति प्रायेवचनाद्वेत्यत्र प्रधानप्रा हि

येयत्वान्यानि यथानानि तद्वचनादिष्टुक्तं तथा विशयेऽप्य दर्शनादिति संस्कारप्रायेयत्वान्ये संस्कारा गोदोहनादयश्च
त्वास्यदर्शननिमित्तिन त्विह यत्वान्ये वेदास्तेषामृगादीनां दर्शननिमित्तमपि शक्यं वक्तुं। नहेतत्त्यतिरिक्ता वेदाः संति येषां मध्य
पाते संकीर्त्येरन्। अतो नेह प्रायदर्शनमस्ती।ते। तत्रोवस्याह। वेदप्रायेवेदोपक्रमे वेदशुद्धिजनितसंस्कारव्यामोऽमनसिक
मेशहः श्रूयंते तद्दर्शयति ।।प्रजापतिर्वा इदमेक आसीदिति यत्तु विष्णुदेशवली यस्यादर्थवादपरस्यो वेदभागेव प्रवि
प्रयोलवतीति।। तत्र ब्रूमः। विध्यर्थवादसंबद्धमन्यदेव बलाबलं। मुख्यप्रयात्तु न त्वेनजानानामन्यदेवाणां।। येहि विष्णुदेशा
तारस्मादर्थवादाः श्रूयंते तेषामपि दौर्बल्ये तु कस्मात् श्रूयंते तेबलीयांसो लवंति सर्वस्यैव हि शब्दस्य स्वार्थातिलंबने विरोधः
कारणं। सवश्रुतिर्योगिनिदृष्टे विरोधो विज्ञायते। तदिह यदा त्रयो वेदा अश्रुज्यंतामेऽर्ची वेदस्त्यादिश्रूयते न तदा जातवचना
नामृगादीनां उच्चारणमस्ति। यद्दर्शनेन वेदशब्दो वयवलक्षणार्थोऽपि वेला। अतश्च न तावत्स्तुतिदृष्टतेनैव व्यामा बुद्धिरप्येदानी
मृगादिशब्दः स्वार्थपराः संतो न संबध्यंते श्रुतिवजातलक्षणं प्रतिपद्यंत इति। तेन सत्यपि विष्णुदेशगतत्वे दौर्बल्यं। सुव्यंजनासु

रम१

३मा॰वा॰ वैदिकानां लोकवाक्यैर्वा मिलितस्य बलीयस्त्वात् । न तु पौर्वापर्ये स्वदौर्बल्यं प्रकृतिविकृत्यनेनोत्पन्नमप्यर्थवादानुच्चैते दत्ता
३ त्वंवा धित्वा विध्युद्देशस्थानमेव दृष्टेते । नैतद्देवा पौर्वापर्यबलीयस्त्वं तत्र नाम प्रतीयते । अन्योन्यनिरपेक्षाणां यत्र जन्मधियां ल
वेत । ये हि भिन्नवाक्यगताः परस्परनिरपेक्षा विरोधिनोर्थाः श्रूयंते तेषां पूर्वस्योत्तरेणोपमर्द्दे नैव लब्धात्मकत्वादुत्तरस्य पू
र्वोपमर्द्दं विनात्मलाभानुपपत्तेः पौर्वापर्यबलीयस्त्वन्यायो भवति । यत्र त्वेकवाक्यतया परस्परापेक्षाणां श्रवणं न तत्रैवं
तद्भवति ॥ तत्र ह्याकांक्षावशेनैकवाक्यत्वात् भवति पूर्वप्रतीते चोत्तरमात्मानुगुणमधिकं वाकांक्षति अतश्च यदनधिक
मननुगुणं वा तदनपेक्षितत्वात् तन्नैव तस्मिन्वाक्ये स्थाने चाविधमानेन पूर्वबाधः शक्यतरतिर्बलीयस्त्वं भवति तदिह
विध्यर्थवादयोः समानविषयत्वात् पूर्वपदे वार्थवादे वेदाः संकीर्तिताः सौवदेव किमथेषां विधास्यत इत्येतदवष्टंतां न तत्
श्रु किमेषा विधेयमित्येतावन्मात्रमपेक्षितेन उक्तस्य किं चिविधास्यतइति । तेनोत्तरस्मादर्थवादप्रेक्षितमात्रं गृह्यते विधे
य चापेक्षितं न विधिविषयस्तु स्तैस्वादिमात्रं संवध्यंते न तु जागादयः । तत्साम विवक्षितत्वान्नैवेषां विध्युद्देशे स्थितिमितिनार्थ ३

वाधंते

वादं अर्थवादस्थएव तु विधुदेशाविषयत्वेनापि वेदेकवार्यत्तौ। तस्माद्वेदलक्षणार्थं स्मृत्यादीनां वेदमूलापकत्वादहेतुलक्ष
णायुक्तः। अतएव शक्तोप्येवावयवं लक्षयितुं स्मृत्यादयस्तु नियमस्थत्वात्समुदायं न लक्षयंति। यथा चाच्छवार्थवादानामनुवादत्वा
ल्लक्षणवृत्तिरदोषः। तथाचार्थवादावगतविषये विधौ स्मृत्यादिष्वावश्यकानामनुवादकत्वात् लक्षणायामप्यदोषस्तेनैषाव
वनव्याप्तिः। यस्माद्वेदमेते वेदाज्जाताः। तस्माद्देशादौ पुष्ट्या दिकर्तव्यमिति वक्तव्यौ। तमेवार्थं सिद्धमंगीकृत्य स्मृत्यादयस्तच्छ्रुते
अन्यथा स्वसंवदमेव स्यात्। विध्यर्थवादयोर्नानाविषयत्वात्तस्माद्धेताधिकार इति लिंगाच्च॥ लक्षणापि च यावद्दृष्टपूर्वीतस्य
मेवशीघ्रतरं बुद्धिर्भवति स्मृत्यादयश्च वेदे दृष्टपूर्वीसूदर्शयति। अस्तिः प्रातरिति त्रिष्टुप् वेतावत्स्यादेष वेदशब्दमाहुर्वयो
हेतुः शब्दस्य वेदविषयत्वं जातं चतुर्थं वेदेरश्रुत्यन्यः स्त्यैवस्यपेष्टकः शब्दः स ब्राह्मणके वेदेष्वस्तु युक्त इति प्रयते। यस्य येद्ब्राह्मणं वे
दशब्दप्रयोगो मंत्रेष्ठदृष्ट इति सत्यमस्ति अचापि लक्षणा तथापि तु शास्त्रस्थत्वात्तन्निमित्तत्वादिति वेदत्रयापत्ती॥ त्रयी विद्या
त्वाच तद्धि हि। यदपि लौकिकेनापि प्रयोगेन कार्यसोप्यस्ति वेदेऽस्मृत्यादीनां कथस्थ्रृगतुः सामानि तावत्त्रयी। त्वेवप्रसिद्ध

श्ला·वा· नितत्तत्र त्रयीविद्याशब्दव्युत्पत्तिः सच वेदत्रयाभ्यासे निष्पद्यते न ज्ञाते त्रयविद्धिं दोषे ऽज्ञाते त्रयजे श्रुप्यप्रयोगाद्वेदेषु
४ यी विद्याशब्दे त्रयीशब्दो वेदेष्वप्रयुक्त इति तत्समानाधिकरणानामृगादिशब्दानामपि तद्विषयत्वं विज्ञायते। तस्मादपि वेदेषु
गादिप्रसिद्धिः। व्यतिक्रमेऽप्ययथाश्रुतीति चेत्। अनुलाघवमेतत्॥ न सर्वस्मिन्निवेशात्॥ न पावमाने एव वेदांतस्योपदेशो सर्व
ति। यत येन वेदेन विधीयते तत्तेनैव प्रमाणेन क्रियत इत्युच्यते॥ ततश्च यस्य धर्मस्य यस्य यत्र विधानं प्रवृत्ते तस्योपदेश्य
ते यदि न्नूलयव विधास्यते तत्ततोयज्ञन्तयस्थेनोत्पयश्रुती त्याहिनास्ति। तदा गत्या विकल्पो गृहीष्यते। वेदसंयोगान्न प्रकर
णेन बाध्येत। बाधेतेति वा पाठः। धर्मोपदेशाच्च न हि द्रव्येण संबंधः। जातधर्मप्रदेशे ऽच्यते ऽपि साम गायतीत्युक्ते साम ये रवि
योगाद्धर्मणे वसामधर्मसिद्धेर्द्रव्याद्गुणनरूपदेशश्च। न हि कश्चित्सामाच्चैः धारस्नेता छवमुच्चैस्त्वादयश्च सामान्यानयथा
चारयितुं समर्थो वेदाधिकारस्त्वन्यह्वेदेन विधीयते अयं च सामवेदेनेत्यर्थं वदुपदेशहयं। अन्तः कृत्प्रजापतिहृदया यर्थाभि ४
तरत्वापित विप्पत्तीति चेन्न तस्य ज्योतिष्टोमाभीनंगत्वात्। प्रकरणेऽग्रयंशो च साम्नामुपदेशः न चैतेषां मन्त्रकीर्णाणां प्रयोगो

ग्र२

त्यविषयत्वात्त्वमेतद्यस्मिन्नुक्तमेवानर्थकं। तस्मादपि वेदाधिकार इति सिद्धं॥२॥ गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन
वेदसंयोगः॥ इदानीं यजुर्वेदोत्तरीयस्य प्रधानस्य वेदोत्तरीयमंगं भवतीति तद्योगस्य वेदधर्मः कतमः कर्तव्य इति संदेहे
प्रात्यात्मिकत्वाद्व्यपदेश धर्माणां पर[illegible]समाम्नानं तस्य दीयो धर्मः स्यादिति प्राप्ते अभिधीयते। गुणो मुख्यरूपतो धर्म
ःप्रधानद्वारतोपरः। यत्रैतस्मात्तत्र विज्ञेयं गुणधर्मस्य बाधनं। एवमप्यैकर्तव्ये हृद्युत्तरधर्मो तिक्रमे गुणधर्मोत्ति क्रमितव्य
स्तथा हि प्रधानम विगुणं कृतं भवति न तु गुणस्यापि कार्यस्योपहितमर्थमेव प्रवर्त्तते यदि त्वात्मीयधर्मोत्तरोधेन प्रधा
नं विगुणं कुर्यात् ततोऽस्य यदर्थं वपूर्वं मृदेव हीयेत तत्स्वरूपेस्य गुणेनातेयधर्मंगं विगुणमेव तथापि तत्त्व गुणत्वस्यापि
कीर्तितत्वात्कस्मिंश्चिद्विरोधः तस्मात्प्रधानस्य याजुर्वेदिकत्वात् तदंग स्तोत्रानां सामगानामुपांशुत्वं कर्तव्यमिति। ननु च यथा वन्म
ध्यमाधानस्य यजुर्वेदविहितं तन्माध्यस्थे वोपांशुत्वमित्यवगम्यते एवं सामगानस्य प्रामोति प्रधानमात्रं चायं गानं शाणिच यजु
वैदिकानि तेन तेषां केवलमुपांशुत्वमिति। नैतदेवं वक्ष्यति हि अंगानि तु विधानात्वात्प्रधानेनोपदिश्येरन्निति। तथा विधे
स्त्रैकश्रुतित्वादपर्यायविधानादिति। तस्मात्प्रधानप्रयोगवचन परिच्छिन्नं तत्त्वास्य त्राप्युत्पन्नानामंगानां यद्यैव प्रधानं तं

शा॰प्र॰ नैवविधिगतश्रुसांगस्यैवप्रधानस्ययाजुर्वैदिकत्वादुपांशुत्वेनैवलवितव्यमितिएवंतर्हिश्रुयमेवोगानांयाजुर्वेदिकत्वादु
पांशुत्वंनगुणप्रधानधर्मविरोधद्वारं।यद्वसामगतस्तुपांशुत्वंतत्संगवर्त्तित्वादुच्चैस्त्वेनतुल्यंनैतत्तुउच्चैस्त्वमानप्रधानस्यैति
५ शक्यंवदितुंनापितद्गतेवाधितेप्रधानधर्मवाधोनहितदाप्रधानस्युपांशुनक्तंतस्मादथकेनचित्सुकारेणांगधर्मोपि
प्रधानस्यात्तिधीयते॥ततउच्चैस्त्वमपिप्रधानधर्मस्य[illegible]वस्यादितिपुनस्तुल्यवलत्व॥उच्यते।उत्पत्तिविधिमा
त्रोच्यसामान्यांवेदांतरीयता।सांगप्रधानसंवंधादुपांशुत्वस्तुगच्छतोपदिहियजुर्वेदएवैषाप्रव्यक्तिःस्यात्ततत्स्वरूपनिमित्त
मेवोपांशुत्वंस्यात्तेषांतुसामवेदोत्पन्नानांस्वरूपतउच्चैस्त्वप्रसंगेप्रधानसंस्पर्शनिमित्तमुपांशुत्वमितिप्रधानधर्मता
।ननुयजुर्वेदेनसांगकर्मोदितंयथावधात्सांगस्यैवोपांशुत्वमित्यवधारणात्स्यैवांगस्वरूपस्पर्शइति।नसांगकथने
नैवाप्राधान्यनिर्दिष्टत्वात्॥उपसर्जनभूतांगंहिप्रधानमेवनिर्दिश्यते॥तेनप्रधानमेवयाजुर्वेदिकमुपांशुत्वेनतद्धर्म
एवमन्यगात्तुपसर्जनीवृकथ्यते।नत्वेवमेवचोदनाप्राप्तिः।ततःप्रधानधर्मीयमंप्राप्नोतिक्रमेण।प्रधानेनहित्वधर्मांग ५
स्तुनिर्विघ्नःसयत्रैववाधितस्तत्रैवप्रधानंविप्रगतंनत्वेवमुच्चैस्त्वंप्रधानधर्मस्त्वप्रवधार्यते।नह्यंगधर्माःप्रधानातिक्रामं

यं प्राप्नोति ४

ति॥ तत्रैव मर्प्यं गधर्मः समाख्यातः प्राप्नोति प्रधानधर्मः पुनः परद्वारेण परोक्षत्वात् विपरीतं बलाबलं प्राप्नोति
।सत्योश्मा त्वात्वा त्रोंगधर्मः शीघ्रतरमवगम्यते। प्रयोगवचनस्य दणोत्तरकालं तु पश्चाद्गतेन एव प्रधानधर्मः
पौर्व्वापर्ये पूर्व्वदौर्बल्यं प्रकृतिवदिति पर्ववाधते। ननु याजुर्वैदिकज्योतिष्टोमाद्यंगानां स्तोत्रशस्त्रादीनामप्यनेनै
वन्यायेनोपांशुत्वं प्राप्नोति संवचनात्तु सर्व्वत्राश्वरांतरत्वालक्षः कथं दर्शपूर्णमासप्रकृतौ वद्धे दध्वय विहितेष्वंगेष्वना
नावेदस्थ रेवाप्ते गुणप्रख्यव्यतिक्रमन्यायेन याजुर्वैदिकः प्रधानधर्मः उपांशुत्वं प्राप्नोति। ततो वाचनिकः स्वरोल
वतिमंडल्या जपलांगांतेय रेमध्यमयोत्तमया तु जादीति। तथा विकृतीनां मिष्टिपशुबंधादीनामेतस्मिन्नेव प्राकृते स्वर
उपयेप्राप्नुवति प्रत्यक्षोपदेशवशेन प्रधानवेदस्थ स्वरप्रसक्तौ तद्ग्रहणाद्वा स्त्रुध मौम्यादित्यनेन न्यायेन प्रयोगवचनस्य चो
दकापेक्षित्वेन दुर्बलात्वोदकप्रापितस्वरग्रहणमेवेष्टं॥ एवं ज्योतिष्टोमांगानामपि दीक्षणीयादीनां प्राकृतेष्वेरप्रापे
प्रत्यक्षोपदेशवशेन बाध्यमाने चोदकवलीयस्त्वेन पुनः स्थिते ज्योतिष्टोमस्य याजुर्वैदिकत्वात्स्वोपकारप्राकृतध
र्मीयग्रहणात्स्वगुणमुख्यव्यतिक्रमन्यायेनैव तद्गतोपांशुत्वधर्मप्रसंगे सति याज्यानुवाक्याकामपि तत्तावत्यादीनां॥

त्वा १

२ भा० ६
यामनुब्रूयादित्येते स्वराः गुणत्वस्य व्यतिक्रमन्यायाबाधेनैव सांगानां प्राप्ताः तथा ज्योतिष्टोमस्य वाचनिकसवनवि
भागविहितमंद्रमध्यमोत्तमोच्चारणावधारणात्र्यहं मानामपि सर्वेषां प्राकृततुल्यमंद्रमध्यमोत्तमोच्चारणान्येव प्रथा
नद्वारेण प्राप्तानि॥ ततो यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशुत्वं तीव्रपांशुत्वे सांगानां दीक्षणीयादीनां प्राधे
प्रधानमात्रवाचिदीक्षणीयादिशब्दोद्देशेन विहिताः प्रधानमात्रे चैते स्वरविशेषा लभ्यंते यावत्पावाचा कामयेत ता
वत्यादीक्षणीयायामनुब्रूयान्मंद्रं प्रायणीयायां मंद्रतरमातिथ्यायामुपांशूपसत्स्विति तत्रोपांशुत्वस्य प्रकृतौ सर्व
व्यापिनोपांशुत्वविधिना प्राप्तत्वाद्दीक्षणीयादिस्वरूपशंसार्थो नित्यानुवाद एवाग्नीषोमीयेत्तु सवनविभागस्व
रेणोर्ध्वमंद्रयाज्यलागांतमित्यादिप्राकृतस्वरप्रतिप्रसवः सवनविभागं तु त्वेवा सांगं प्रयोगं त्रेधा विभज्य मंद्रमध्यमो
त्तमोच्चारणसंपादनं कार्यं॥ एतेनानुबंध्यावत्स्योदयनीयोदवसानीयास्वप्युच्चारणविशेषा व्याख्याताः प्रसुत्याकाल
सवनीयादीनामप्येवमेव स्वरव्यवस्था हे। प्रातःसवनाद्यंतर्गतत्वात्तेषां यथासवनमेव स्वरा लभ्यंते॥ ननु सवनशब्दाना सोम
यागाद्यवयववचनत्वाद्दीक्षणीयाद्यंगानां तदीयस्वरालाभप्रसंग इति चेत्॥ न सप्तमीनिर्देशेन तत्कालप्रयुज्यमानत्व ६

मध्याह्नश्रयणाद्वा। अस्ति द्विषष्ठी लवेदज्ञमवनेत्यः प्रातस्तत्र तदंगमंचमाद्वेष्टमंड्न्त्वा दिविधिर्लिंवेत्र। प्रक्षेप्योत्तरदाधारो व
यावान्मंत्रः स उज्यते॥ तस्य सर्वस्य मंडा दिस्वरयोगांगमाश्रितः। केचिदाज्ञ्यर्यदाधारस्य मध्यत्वं सवनेष्विह्म। तदा तेषां
नमंडादिः स्यादनाधेयत्ताश्रुतेः। आधारे सवने लिङ्गं पक्षे धेयत्तया श्रुतं। सवनीयादित्तस्यै धमंडाष्टुचारणां नवेत्र। प्रो
त्रश्च्छानुवाक्या। द्विशेषस्तु सवनस्याथः षष्ठ्युत्ता वान्न तस्यैतेयुक्ता मंडा क्षयः स्वराः स्तुक्तेनैव दोषो सिपत्तः षष्ठ्या वि
नाप्यय। षष्ठ्यर्थः संलवत्त्पेवतदाधारत्वकल्पितः। यथा हि शंकुनिर्दिष्टो डद्या घपितशेष्यते। ततश्चाधेयुक्तर्मीयः सङ्घ
येविधिर्धीयते। यद्विवाक्यो नञ्छा दिक्तत्रं श्रुत्यांगमेवनः। छाधार एवात्रस्यापि सवनानीतरांगवत्। नानावेदस्वरस्य
स्तोत्रादेः शस्त्रादितः प्रधानांगतया पक्षाद्वयं श्रुत्वे नवाधितः। ततो वाचनिकेनैव यथा सवनसाविना। मंडादिनास
मुक्ता निश्रुत्यंगानिषद्यं इहो। एतेन सर्वं ज्योतिष्टोमविकाराद्या ख्याताः। कश्च न रिदानीं नानावेदस्वरस्या त्वकाङ्क्षो
त्ते विषय ति॥ उच्यते॥ तङ्कहणत्वाद्ध धर्मस्यादधिकारस्यामथ्यादिध्य कः शेषे इति विल्कल्पनीयः। यस्मात्क तत्रस्य
गयुक्तायां विकृतौ वेदांतरीयमसर्वमंगं चोद्यत इति॥ ननु तत्रापि गुणाच्च मुख्यव्यतिक्रमाये नयथा नधर्मस्यैव एवाण

श्रा ५

उ॰शा॰च॰ वर्त्तर्हि यागविकृतिर्यस्मिन्नेदे लवति तस्याः शेषेष्वंगेषु यथाप्रकृति प्राप्तेषु यस्मिन्नेव वेदे गीतं तस्मात्सर्वं चोद्यते सविष
७ य इति। सोपि नास्ति प्रधानद्वारेणैव लब्धत्वात्तेदेवत्तर्हि प्रधानं विषय इति। न तस्यापि प्राकृतत्वात् वत्तद्वत्वान्नतर्हि प्रधा
नद्वारेण सर्वस्यांगस्य प्राप्तिरिति तदेव विषय इति। नैवमपि यः प्रधानस्य धर्मस्तस्यैव तत्राप्तिवाद् तासु पि चत्रेधा
विकृतेष्वयं तेषु यत्स्यागधर्मेषु स्वरेष्टित्ते यद सर्वमपि तत्प्रागपाति लवति तस्मान सूपावदप्रकरणवर्हिः स्रुत्पन्नमिति
लवितव्यमेवप्राकृतेन धर्मेणतस्मादपिनास्ति विषयः प्रकरणाम्नानं वा त्यंतमेवानर्थकं स्यात्। अत्रसमाधिः उपां
शुयजुषेतिता वत्सर्वदर्विहोमेष्वर्थवद्दक्तामवेदयोरपिकाम्यनैमित्तिकेष्वंगेष्वर्थवत्ता। मंडं प्रातःसवनइत्यादि
हि नित्यत्वाद् नित्यैः काम्यनैमित्तिकैरसंवध्यमानं नित्यांग विषयमेवलवति। तेन यहग्वेदसामवेदाभ्यां किंचित्का
म्यं नैमित्तिकं वाचोद्यते। तत्सर्वमुच्चैः कर्त्तव्यं। यथा तंतिनमलिम्लुचे घहतेचिंदति श्विमप्रक्तादि। एवं याजुर्वेदिमप्यु ७
पांशुत्वप्रदाहर्त्तव्य। तथायानिमुत्पोत्तरकालान्यंगानितेषु सवनयहणालावायथा वेदमेवस्वरइत्यवल्कयसाम्नाह
नामप्सुह्व स्वमिद्धिः। अन्यथा हि यथेष्टप्रयोगः स्यात्। दीक्षणीयादि परिसाम सु ह प्राचीन मग्नीषोमीयादित्य नेनोपां

मात्रापेक्षयातेनाक्रियतइति। नकारस्यकार्हेत्वत्तिंप्रायेणोपन्यासइति। तत्तुनयुक्तमेवंहिसतिउपरि २

श्रुतत्वं॥ एवकर्षसामान्यं अनर्थक्यैःप्रवर्गेणोत्पेवमुक्तैस्त्वं॥ आधारसामान्यं यजुर्वेदिकप्रधानविधिविहितत्वादेवोपां
श्रुतत्वं। यएवंविद्वान्वामदेव्यंगायतीत्यादौ। नियमस्तुदैर्वर्तितादवाक्याच्चेवतस्मादिहानुदाहरणं॥ तत्रकेचिदाहुःस्व
रूपोत्पत्तिविनियोगबलाबलचिंतैवक्रियते। नगुणमुख्यविरोधचिंता। तत्रचविनियोगाधीनत्वादनुष्ठानस्यतद्ब
लीयस्त्वमित्येषनिर्णयःस्यात्। तस्मात्सामवेदशाखायामध्यक्तस्यांविदस्येषांविधिरत्रउदाहरणमित्यपरे॥ तदानु
यजुर्वेदेऽनःश्रुतेर्मन्दंफलंस्यात्। अथापिसावित्रविधिवदाश्रीयते। स्वरपिकल्पश्चपूर्वपक्षःक्रियते। यदिउदाहि
तै६ यते। अनुदाहरणान्नेतदुपपद्यते। तस्मादुत्पत्तिविनियोगयोरेवगुणमुख्यत्वमित्येवमधिकरणमारभ्यते। यत्रवेदांतरोत्प
न्नंवस्तुवेदांतरेणविनियुज्यते। तत्रकिमुत्पत्तिवेदधर्म्मःकर्त्तव्यःउतविनियोगवेदधर्म्मःइतिउत्पत्तिपूर्वकत्वाद्विनियोगस्यो
त्पत्तिवेदधर्म्मइतिप्राप्ते विनियोगवेदधर्मइतिब्रूमः। कुतः। उत्पन्नेभ्यदर्थत्वाद्धि नियुज्यमानस्यपश्चरार्पणत्वात्तदानीमेव
यःस्वरोवगम्यतेसएवचोदितोनोत्पत्तिस्थस्तत्कालेविरोधाभावात्। अथवानेवात्रव्यतिक्रमशंकेन बाधोविरोधोवाविधी
यते किंतर्हिव्यभिचारोऽग्रायस्यप्रवृत्तिश्चेनैवंचिंत्यते। यत्रोत्पत्तिविनियोगौव्यतिक्रांतौ अन्यत्रोत्पादितस्यान्यत्रविनियो

गमत्वकात स्वेदसंयोगोलवल्लितिति॥ तथैवोत्पत्तिसरसंयोगे विकल्पे वा शमेवेति नियोगवेदसंयोग आधाराच्च दिस्तत्तरं
अथैवं चिंतायवाच्यत्व प्रधानेअथ्यत्रवागतंत्रांगस्यकेनवेदेनव्यपदेशो स्यिति॥ ततश्चात एव प्रधानवेदेनव्यप
देश इति निर्णयः॥ अस्मिंस्तु पक्षे तत्र ह्महाणा ह्वाप्रधर्म्मास्या दित्येतद्वाभित्वा प्रधानसमाख्यातएक एव प्रकृतो विष्ठ
तो चकर्तृप्राप्नोति॥ अथयचोदककवली यथाद्देगवेदसमाख्यातत्त्वग्रहणं॥ ततः श्रेरोपितथैदेत्यर्थप्रधानस्य ग्र
हणं॥ अतश्चोत्पत्तिविनियोगापेक्षयैवैषविचारस्त्वेषेवस्थाशोत्तना॥ तथावाधानोदाहरणं समर्थितलवत्तिय
स्विलुगुणास्तुस्यव्यतिक्रमो गप्रधानधर्म्मविरोधो व्याख्यात्यतेततेगुणविरोधवत्ताद ध्यीदित्यनेतसहापोनस्कं
संप्रधारणीयं॥ २॥ तथपक्षेनोत्तपक्षति॥ इदानींयानिवेदांतरेषु श्रूयंते प्रधानानि तानि केन व्यपदेष्टव्यानीति वि
चार्यते॥ तत्रैषनिर्णयोयतोत्पद्यंते तेन यजुर्गुणार्थं श्रूयंते॥ किं प्राप्तं शाखांतरवत्समर्थ्यजोत्पद्यंते ततश्च धर्म्मविकल्पोयथावो
लयत्रस्वरूपस्यगुणानां चाश्रवणात् कदाचित्किंचिद्दत्तान्यथमिवं विकल्पप्राप्तामास्यते॥ न शाखांतरवद्युक्तो विकल्पो वेद ८
गोचरः॥ तस्मादेको गुणार्थो त्रकश्चिदेको विधायकश्च सतुज्योतिष्टोमादेः कतम इति॥ गुणानांयत्रत्वयस्तस्मिति कर्त्तव्य

तात्मकं॥ तस्य चरतेनैव लिंगेन तत्स्य कर्त्तव्यतेष्यते॥ यजुर्वेदे च ज्योतिष्टोमस्य दीक्षणीयादिकेति कर्त्तव्यत्तावक्षी॥ तस्मा
त्तैवास्योत्पत्तिस्तथा सोयजुर्वेदेन क्रियतेऽसुच्यते तेन उभीयमाणत्वान्नेतप्रमाणेनक्रियतइत्यर्थोपपत्तिने
वध्यापारेणानुष्ठानमपित्तैनेव क्रियतइतिव्यपदिश्यते॥ नत्वेतद्रूपस्वव्याख्यानंयुक्तं॥ जतःश्यग्न्यस्यगमकत्वेन
प्रशक्तेरवधारितं॥ तदल्पंवऊवातस्य शक्तीतोन विशिष्यते॥ याद्दशस्यहि क्षमस्यगमत्वावधारणं॥ सतादृक्कवङ्क क ४
रन्यो वा वक्तिंगमयति ध्रुवं॥ तथेहेतिकर्त्तव्यता लिंगत्वेनोपन्यस्ता सा यत्राथन्या तत्रापि कर्त्तव्यतया विनानुपपद्य
मानाशक्तौ त्येवगमयितुं॥ नैवहीहांगत्वस्यस्वमितिकर्त्तव्यतामता॥ किंतर्हि गंपदेवाङ्गरितिकर्त्तव्यतापिमा॥ तच्च
यद्विवेदांतरस्थप्रधानानुवादेनाल्पा विधीयतइत्युच्यते शकांचवक्तुंवह्नापितथैवैवधास्यत इति॥ तच्चैतत्स्यादल्पाश्रुयं
वेदांतरस्थस्य विधीयतेवक्षीतुद्दुःखमिति नैतदेवं वह्नामपि वाक्यवक्तृत्वस्य तुल्यत्वात्॥ तस्मादकारणमेतदिति॥ ए
वं वर्णनीय मिह इज्यदेवता क्रियं कर्मस्वरूपत्वेनावधार्यते तच्च यजुर्वेदे सकलमाम्नायते वेदांतरे तु क्रियमाणं सर्व

र्यस्तोत्रशस्त्राद्यादीनि पठ्यंते तत्तत्स्तुत्यदेवताकांक्षित्वमनपनीतमिति श्रशकां ब्रतं त्रक्रियाविधानं। तथा च शास्त्रोत्तराङ्घ्रि
करणे व्याख्यातं यजुर्वेदे वसमस्तु रूपाम्नानात् हिना। प्रिस्तो त्रादिभिः शक्यते यागो निवर्त्तयितुं। वचनसामर्थ्याददृष्टार्थानां
स्तोत्रादीनां ग्रहणेऽमतोऽयं मूत्रार्थो यद्दुत्तयवेदश्रुतिकर्मत्तद्रूपत्वपक्षेन सामसूत्रेन निराकांक्षीकरणसमर्थेन नि
र्णीतव्यमिति। आकस्मवेदयोः शुद्धत्वधर्मवान् ज्ञ तेले दोषादानं निःफलमिति मत्वोल्लयश्रुती स्तुक्ता॥ ३॥ अथ संयुक्तं प्र
करणादिति कर्त्तव्यतार्थित्वात्॥ एवं तावत् श्रुतिलिंगवाक्यानि प्रधानज्ञेय संकीर्णविनियुक्तविषयाणि प्रत्युदाहरणं
व्याख्यातानि। तत्र विधिविनियोगाभिधानात्मिकायाः श्रुतेर्विनियोगसामर्थ्यात्मकस्य च लिंगस्य केवलपदप्रयो
गालम्बात्पदांतरसंनिधेरवश्यं ला विलंबाद्वाक्यमंतर्गतप्रायमेवेति तत्सा ह्यानुग्रहणेन सूचितं। अथ वृषेदोवाप्रायदर्श
नादित्युपक्रमोपसंहारेणैव वदवेदस्य धर्मत्वावधारणादिदमेव वाक्यविनियोगमुद्दिश्य मिति तन्नपूर्वोत्तरगतिमात्रेणवा
क्यस्य विनियोजकत्वं व्याख्येयं॥ यत्तु लाभकारणे रूपायेत्तु द्दृष्टं। शकां तत्रापेंद्री वऋत्याया श्रुतिरेव विनियोजि ९

हा २

त्यादिप्राय:१

केतिवक्तुं ॥ अथ क्रियामात्रसंबंधेश्रुत्याक्तते विशेषसंबंधो वाक्येनैव ॥ तस्मादुत्तरयत्राप्रित्यपति आयः समयेष्वाम
पितृलक्षः तत्रापि धेंद्रो त्त्वयस्मात्तव्यमात्रापेक्षणाऽर्हमत्यमिति च साधनमात्रापेक्षित्वा द्विशेषसंबंधो वाक्येनै
वा तस्मादुत्तरयत्रापि तदंतर्गतिः शक्याद्दर्शयितुमिति ॥ तयोः श्रुतिवाक्ययोरुत्तरयत्रोदाहरणमिदानीं बलाबल
चिंताप्रस्तावसमेत्योत्तरत्रापयिष्यामि प्रमाणानि स्फुटरूपेण विनियोगसामर्थ्येन चैव दर्शयति ॥ तत्र प्रकरणं विनियो
गाज्ञानसंशयविपर्ययाणामन्यतमेनोपपद्यमानस्मिन् ॥ यावद्वाक्येनैककथ्यते तावद्वाज्ञानेन लव त्यथवा सदपि प्रसंगा
लावान्नाख्यातं स्यादिति संदेहो ऽथवा वेद्यान्तरश्रवणात्तत्सामर्थ्यानुसरणाकांक्षितयोग्यापि पदांतरसंनिधानेन
अन्य· ७ प्रकारो ऽन्वितस्माप्रकरणादीनि प्रमाणांतराणीति प्रप्रेक्षिधीयते ॥ अविच्छिन्ने कथं तावेयत्यथा नम्यपठ्ये
अनिर्ज्ञीतफलेकर्मतु स्यप्रकरणां गतो ॥ दर्शपूर्णमासाख्यां प्रयाजसंबंधपदेकथमित्येतस्मामाकांक्षायामविच्छिन्नायाम
श्रुतप्रयोजनानिकर्माणि पठितेसमिधोयजतितनूपातं यजतीत्येवमादीनि तत्र दर्शपूर्णमासयोः कुतश्चिदनुग्रह

३ भाव॰ सिद्धान्तवितथ्यं॥ प्रयाजादीनां चक्रेण विसाध्येत न च दर्शपूर्णमासयोः सिद्धरूपकारं श्रुपदस्य वाक्यस्य प्रकरणात्करणां
न्तरेषु प्रत्यक्षादिपंचकेन प्रत्यक्षादिपंचकाद्वा तेन वा शब्देनोपलभामहे॥ तथा प्रयाजादीनामवश्यं वोलप्येनापि कृतार्थ्ये
१० भवितव्यं। यदि उक्तेन वित्स्वकारेणनावगमिष्यामः ततो नो श्रीत्यवगमिष्यामः। अपि च प्रकरणं प्रमाणां नचात्यंतसन्नि
कर्षस्यैकं संबंधकारणं। यथा हि सन्निकृष्टेन लप्स्यते तथात्राविप्रकृष्टेदेश क्लिंमञ्चरति। नदि होपकारकल्पना प्रमाणं
लघ्वा वि प्रक्र॰ ५ सन्निकृष्टमंगमनुजानामितु लघ्वीकुं ज्ञावशे नैवं विज्ञायते। यं दर्शपूर्णमासबुपकारमाकांक्षतः प्रन्नूनमेतैः प्रजयाजादि
भिः क्रियते। यच्च प्रयाजादयः प्रयोजनेन सह संबध्यातिराकांक्षीमपेक्षं तेन दर्शपूर्णमासोपकारजति। न च तु लयोरन्यत्वं
निकृष्टतरमस्ति॥ यच्चाथकल्प्यते तस्यान्येन सह संबन्धो निराकांक्षी लत तस्यनेह संबंधाकांक्षा विद्यते। तेन न प्रयाजादीनां
विश्वजिदादिवत्फलकल्पनं। नापि दर्शपूर्णमासफलानुपानाः। उभयाकांक्षालक्षणसंबंधालाबेष्वन्यतराकांक्षालक्षण
:संबंधोऽस्ति तेन संभवो। तस्मात्प्रकरणाच्चदर्शपूर्णमासयोरेव परस्परं नियमः सिद्धः॥ असंयुक्तं प्रकरणात् किं सर्वश्रुतिलिंगवाक्यैः संयु २०

क्रानां द्वित्वकत्वसुक्रुप्रतिप द्विधानप्रभाद्विशावृतत्वेषणोऽप्रकरणविनियोगनिहृत्यर्थं प्रकरणविरोधिनावाः संयु
क्तमितिद्रष्टव्यं । अविरोधिसंयुक्तानां वीदीत्यो हितिर्बर्हिर्देवसदनं दामयुणयाकीणातीत्येवमादीनां प्रकरणस्थवी हि
वर्हिः कार्यैः संवध्यमानानां प्रकरणसमावेशोपपत्तेरनुसामर्थ्यसिद्धत्वात्तत्र कारणं नोक्तं ॥ ४ ॥ ॥ क्रमस्थदेशसामा
न्यात् ॥ पूर्ववदेव क्रमसमाख्ययोरप्यज्ञानादिति उपन्यासः कर्तव्यः तत्रैतत् क्रमो हि द्वेधा पाठदेशसामान्यं नन्दाः पा
ठानुष्ठानसादेशाद्धि नियोगस्य कारणं ॥ विनाप्यनुष्ठानदेशसाम्येन यावदेतिप्रदेशोऽन्नागोवे प्रधानं पठ्यते ॥ तावत्येव
मंत्रेषु मंत्रेष्वप्यंगोऽगापयेहावेलायां यथासंख्यन्यायेन समानदेशत्वाद्धि होमं निधानं भवति । प्रथमस्य हि प्रधान
स्य मंत्र मस्त्विति ज्ञेवरूपमंत्रसमाम्नायमादित आरभ्यालोचयति । तत्र प्रथम एव मंत्रः प्रथमं हृदयमामच्छति ॥ न चात्था
ति क्रमे हेतुरस्तीति सह ष्टृपते ॥ तथा मंत्रस्पर्शेषिणमपेक्षमाणस्यानयैव प्रक्रियया घेनशेषिणा सह संबंधो भवति तत्रापि
त क्रिया कालात्तया हितीयादीनामप्येवमेव हेतुया दिति रेवयोगेन भवितव्यं । तत्राग्नेयाद्यनुमंत्रणानामाग्नेयादि लि

३शा० गत्वा तेनापि यस्थास्क्षिप्यतीत्यध्यक्तलिंगमुपांशुयाजक्रमोत्तं दर्विर्न्नामासीत्युदाहरति। ननु वा सप्रकरणार्थत्वं वि
११ ज्ञायते तत्र कृत्स्नलीयं इत्यन्यत्रापि विनियोगः प्राप्नोति॥ तत्र केचिदाहुः उपांशुयाजग्रहणात् द्रव्यमप्यनुगृह्यते तस्मा
तद्ग्रहणमिति॥ युक्तं तु वक्तुं ननु याज्ञवत्क्रमः प्रकरणाप्रत्ययं क्लिष्टत्वादिति। लोकस्य हि सर्वार्थत्वं प्रति प्रधाना
ङ्गैः। प्रकरणावगतं न शक्यं बाधितुं॥ तत्रैतावदुत्तरं भवति। येन्ये शेषिण आग्नेयादयः ते क्लिष्टलिंगैः क्रमप्रकरण
वद्भिः सर्वत्रांतरे गवरुद्धत्वान्नैनमपेक्षंते। न च विकल्पोस्य स्पष्टलिंगत्वेन शेषस्यादृष्टार्थानां समुच्चय इति चेन्नाप्रकृतत्या
गघतत्वेनानदृष्टार्थत्वात् तत्रापि वा दृष्टार्थत्वे निरपेक्षाणामंगत्वे तत्रैव मतिसमुच्चया नाग्रयणादावेयादिलिंः कृतार्थ
रूपेस्थितः स न गत्या पुनः स्वक्षेवलवेदस्त्रिवास्यगति उपांशुयाज इति। किंच विज्ञातलिंगानां प्रक्रियाविनियोजिका अ
सौ तस्य च सामर्थ्यसंनिधावुपसंहृतं॥ दर्विर्न्नामासीत्यस्य स्पष्टलिंगोयं न चेदृशं सेतप्रकरणं विनियोक्तुं क्षमं। समयं त्वविस्र ११
ष्टेषु स्मरदर्थविषयत्वात् संनिहितमात्रिसुखं वाक्रिपुच्छ्वं वा तिधत्तेनान्यं उपांशुयाजश्च संनिहितो त्रिपुरवश्चेत्यभिधानसा

मर्थं क्रमादुपांशुयाज विषयं विज्ञायते। न तत्र लिंगेन प्रकरणं बाध्यत एवेत्ता दोषः। काष्ठयाज्याकांडक्रमक्रत्याख्या
तएवानुष्ठानदेशक्रमोपि पशुधर्माणामग्नीषोमीयार्थत्वेन न विरुध्यति॥५॥ आख्यातैर्वेतदर्थत्वात॥ यौगिकीया समा
ख्या सा संबंधप्रतिपादनी। सो विधुद्धादुपक्षाद्यशेषसंबंधबोधकः। आध्वर्यवादिसमाख्यानां वेद एव प्रयोग इति न वोकिकाल
चोपंक्रियते। तत्राध्वर्युर्द्दिन मात्र एवापेक्षते किं मया कर्तव्यमिति तदपेक्ष्यमाणस्य च यदि न ज्ञातं छिद्विशेषोवगम्यते ततो पु
ल्लिं विदिति न विरुध्यति। तथा ध्वर्यवसंज्ञितं कर्मकोमे कर्त्तेति न विरुध्यते त्यवमेव शेषमपेक्षते। तत्रशब्दं स्यादित एव विषो त्येक्षापे
वैकं भवति पदस्याध्वर्योः कर्मेति तदाध्वर्यवशब्दवाच्यं न विरुध्यति। तथा स्याप्याध्वर्यवस्य यः कर्त्तेति स्याध्वर्युर्न्नामेति प्रकृते
र्द्धी विकारस्य द्रूपोपमीयते विकारो ह्यप्रकृति। यथा पिशाचत्वांतरं विकारस्तुल्यवद्यतो परस्पर निरपेक्षौ नित्यसंबंधो च
तथा पिनित्याया एव शब्दप्रवृत्तेर्निमित्तैः संबंधोन्नि मित्तमिति सर्वयौगिकानामेव मत्वाख्यानं। न हि राज्य शब्दस्याप्यादिम
नी प्रवृत्तिर्निरिच्छितो। निमित्तनैमित्तिकसावस्त्वनादित्वे पिशब्दार्थयो रिवेहाविरुद्धं तत्र केचिदुदधिप्रागेतस्मात्समाख्या
वि नियोगादध्वर्यु ध्वर्यवयोरसंबंधादशक्यं यौगिकत्वं समाख्याया विज्ञातुं। प्रथमतुप्रथमसिद्धसंबंधपक्षात्समाख्यायाः

यौजि

३श्रावा· प्रवृत्तिः ततो न समाख्या विनियोजिकास्मादतः परस्परनिरपेक्षयोरेव रूढयोः सारूप्यादुपतिष्ठमानयोरेव विनियोग इति । न
१२ चैतद्युक्तं । नहि रूढानां सारूप्यादुपस्थापनसामर्थ्यं धर्मसंबंधे व्याप्तिः । यथाकथंचिदर्थांतरेऽर्थांतरधर्मान्निराकरिष्यति कि
मुत्त तक्रियाकर्तृसंबंधे । पावकाद्युदाहरणं वा युक्तं स्यात्तस्मात्तद्यौगिकत्वमेवाभ्युपगंतव्यं । प्रत्तुषा क्वयोगात्समाण
नास्तीति । सत्यं प्रत्यक्षं नास्ति । समाख्ययैव त्वनुमीयमानं तद्विष्यति । वेदे हि प्रथममेव क्रियाकर्तृसंबंधो निष्पन्नः तस्मि
न्नतिसमाख्याप्रवृत्तिः । एवं कृतं संबंधं प्रमाणांतरेण प्रतिपद्यमानाः समाख्यादर्शनेन प्रतिपद्यामहे । तेन ज्ञायते पूर्वं स
माख्याप्रवृत्तेः संबंध इति । ननु तत्र प्रथममेव संबंधः स्यादासीत्तोपि सत्त्वामा चेणो वस माख्यां प्रवर्त्तितवानन्यथादि द्वेषादिम
तीस्यात्ततः प्रयोक्तुः प्रथमं संबंधावगत्या लवितव्यं । न च सा संभवतीति पर्युनुयुज्येमहि नित्यसंबंधाश्रयणो न तु तत्र नित्य
प्रयुक्तया समाख्यया तेनं कश्चिद्विसंबंध इति प्रतिपादितं तच्च यथा तु उपपद्यते शेषको खिलावः प्रश्ना क्रियायते । तस्माद्यौगिकैव स
माख्यया विनियोग इति सिद्धं । श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् । श्रुत्यादीनां प्रमाणा १२

पि श्रुत्यादीनां बलाबलं विचार्यते। न त्वलिङ्गविषयाणां न संभवतीति समवाय एकार्थोपनिपातो विषयत्वेनोदाहृतः प्र
त्र केचिदाहुर्विरोधग्रहणं कर्तव्यमिति। कुतः कारणात् यत्तु न पेत्यत्र समपेहि सत्यपि॥ विरोधाभावे तेनैव चिंतयंति बलाब
लं। एक एव हि स्वरूपादिः शेषः श्रुत्या सामान्यक्रियासंबंधी वाक्येन तद्विशेषश्च क्रतस्य प्रकरणेन ज्योतिष्टोमिकस्य॥ सत्य
पि चात्रानेकप्रमाणसमवाये परस्परानुग्रहनिमित्तत्वाद् विरोध इति बलाबलविचारो न संभवति। निर्विशेषसामान्यानुपपत्ते
ः क्रतुप्रत्यक्षरूपमात्रप्रयुक्तत्वेनानर्थकत्वाद पेक्षिते हि श्रुति वाक्यास्यां वाक्यप्रकरणे। तस्मात्कर्तव्यं विरोधग्रहणमिति। न वाक
र्तव्यं। कुतः प्रमाणविषयत्वेन हि समवायो विधीयते। सर्वैकार्थप्रमाणानां शेषाणां चावगम्यते। श्रुत्यादीनां तावन्नैव प्रमाणसम
वायोऽस्ति न ह्येकत्र संभवमात्रं समवायः किं तर्हि विषयैकत्वं। इह वारुणस्य क्रियासंबंधः श्रुत्या तस्य तु श्रुतिकल्पितस्य क्रि
याकारकसंबंधस्य तत्त्वयोग्यपेक्षावशेन क्रतुविषयत्वं तावत्प्रयोजनानवाप्तेः रपेक्षान्तरे सत्यपूर्वसंबंधवतः क्रतस्य ज्योतिष्टो
मार्थत्वमिति विषयनानात्वमतश्च सर्वेषां विनियोजकत्वमविरुद्धं। न चात्र विप्रकृष्टग्रहणे सन्निकृष्टस्य बाधो दृश्यते न हि क्र
यं गृह्णन् वारुणायाः क्रियासंबंधो बाध्यते। नापि ज्योतिष्टोमे कुर्वन् क्रतुसंबंधं॥ यत्र त्वेकः शेषस्तावानेव संबंधो तेर विरोधिनैकेन

प्रमाणेनान्यशेषत्वे विज्ञायते परेण तद्बाधानुपपत्तिर्नाशेष्यान्तरार्थः। एकसंबंधे च कृतार्थस्याकांक्षाभावान्नविनियो
गान्तरानुपपत्तिः। तत्र प्रमाणयोः परस्परापहारोऽसमानविषयत्वलक्षणः समवायः। तथा यत्र शेषभेदेऽप्येकस्मिन्नेव शे
षिणि तुल्योपकारनिबंधन एकेन प्रमाणेनान्यः शेषः साधनत्वेन प्रतीयते। अन्येनापरो न चैकमाश्रित्योपकारः शेषी शे
षान्तरमपेक्षते। तत्राप्येकविषयापहारित्वात्समवायः। स च विरोध एव मतिलवतीति समवायग्रहणेनैव सिद्धो विरोधः। य
त्र पुनः स्पष्ट एव शेषभेदो यथा समिधो यजतीत्यादिषु यत्र वा तस्यैव किंचिदाधिक्यं भवति। यथा तुणायांद्याख्यातं। तथा
यत्र शेषिभेदो यथाग्नेयादिष्वष्टाकपालादि नायत्र वा तत्कृतमाधिक्यं यथा दर्शपूर्णमासाङ्गानामेवोपकारभेदस्तत्रा
पि विषयान्यत्वादसमवाय इति। यत्र श्रुत्या विनियुज्यते पश्चात्समाख्यया तत्सर्वं तुल्यं। पशुसर्वाङ्गजत्वं एकः प्रधानोपका
रः तत्रैषामपर्यायविधानादेकमेव प्रामाण्यं शेषत्वं चेति व्यापारभेदादसमवायः। तथा यत्र स एव शेषस्तस्मिन्नेव शेषिणि मंत्रि
लिङ्गेन विप्रकृष्टेन च प्रमाणेन विनियुज्यते तत्राप्येकस्यैव प्रमाणत्वेनेतरस्य प्रयोजनान्तरार्थत्वादसमवाय इति। तस्मादवि
रोधविषयमेव समवायग्रहणं। तत्र षण्णामपि एकत्रैव समावलेकथयितव्ये क्रमवर्त्तित्वाद्वाचो युगपदशक्तेरेकैकस्य संबं १३

धारणा। यत्तु द्वितीयोपादानं तत्प्रतियोगिना विना बलाबलकथमाशङ्क्यैवे नोच्यते द्वयोर्द्वयोरिति एकार्थवर्त्तित्वाद्वा
चष्टित्वाद्वा च इत्यस्यापरा व्याख्या। येयं बलाबलवागेषा प्रत्येकं श्रुत्यादिषु समवैति न समुदाये तानि हि शेषविनियोगे
नार्थवंत्ति न बलाबलमतः तस्याः प्रतिषधानहृद्वित्वादयोगपद्येनैकैकस्य संप्रधारणायां कर्त्तव्यायां द्वितीयोपादानं
विरोधबलाबलबाधानां प्रतियोगिद्व्यपात्ते दर्शयितुमसंस्तवाद्द्वयोर्द्वयोः संप्रधारणेत्युक्तं। तत्रैकैकस्य पंचविधिः पंच
लिः सहविचारे कर्त्तव्ये पदैकैकेन सह क्रियते। तद्बाधितबाध्यस्य बाधकबाधकेनाबाधस्य तु ज्ञानत्वाधानि हि श्रुति।
बाध्योर्लिंगादिलिङ्गाधीनं तेषां निश्रुत्याबाध्यंते तेतराभिरिति न तया सह संप्रधारयिष्यंते। तत्र प्रथमं तावत्क्रमप्रमाणसंश्रुतिलिं
गयोः संप्रधारणाप्रति। किमिहोदाहरणमिति केवलपदप्रयोगात्तावत्सर्वत्र वाक्यत्वे सति न श्रुतिलिंगयोः स्वसामर्थ्या
तिरेको लभ्यते इति मन्यमानस्य प्रश्नः। वक्ष्यमाणविवेकाभिप्रायेण। ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति किमिन्द्रस्यैवोपस्थानं
कर्त्तव्यमुत इन्द्रस्य वा गार्हपत्यस्य वा यथा वा समुच्चितयोरथ वा गार्हपत्यस्यैवेति। यदि लिंगं बलीयस्तत इन्द्रोपस्थानमथ।
तुल्यबलत्वं विरोधश्च न ततो विकल्पोथ तुल्यबलत्वेप्यविरोधस्ततः समुच्चयोथ विरोधः श्रुतिर्बलीयसी च ततो गार्हपत्यस्यैवो

प

अ॰ सा॰ वा॰ पस्थानमिति। यत्तु मिन्द्रवद्गार्हपत्यार्थत्वांगीकरणे न वचनान्यथार्थमैन्द्री स्यादित्युक्तं। तदिहस्थापयिष्यमाणा श्रुतिब
१४ लीयस्त्वाभिप्रायेण। तेनैव सर्ववाक्यत्वाभिप्रायेण श्रुतिलिंगे ऽर्थवाक्यत्वभ्रांत्या उन्नः पृच्छति कः पुनरत्र श्रुतिः किं लिंगमि
ति। तत्रोत्तरं गार्हपत्यशब्दश्रवणं मन्त्रसामर्थ्यं चेति। परः पुनराह। यद्येवंविधपदसमूहात्मके श्रुतिलिंगे हंत तर्हि वाक्यं
नाम न किंचिदवशिष्टं॥ तदुच्यतां। अथवा वाक्यं नाम किमिति। सिद्धांतवादी उतथैव शक्यविवेकज्ञानत्वं मन्यमान आह।
संहत्यार्थमभिदधति पदानि वाक्यमिति। यद्यपि च न संहतानां कश्चिदेकोभिधेयस्तथापि गम्यमानाभिप्रायेणोक्तं अथ
वैकस्मिन् लक्ष्यमाणार्थप्रयुक्ततया संघातत्वमापादितानि यदा अर्थमभिदधति तदा तद्रूतान्येव संति वाक्यत्वं प्रतिपद्यंते इ
ति। यद्येवं ततस्तयोरप्युदाहृतयोर्मन्त्रब्राह्मणयोर्वाक्यलक्षणयोगात् वाक्ययोर्विधेयंस्यावधारणं न श्रुतिलिंगयोरिति यदि चा
वश्यं श्रुतिलिंगयोर्विरोधः समर्थनीयः ततः श्रुतिलिंगवाक्यानि लक्षणतो विवेक्तव्यानीदं नाम तेषां परस्परमंतरमिति ति
। तदभिधीयते। यच्छब्दस्योक्तिसामर्थ्यं तल्लिंगं त्रिविधा श्रुतिः। विधिशक्तिविनियोगाख्या वाक्यं तु प्राक् प्रदर्शितं। न तु सामर्थ्यपू १४
र्वकत्वाद्युक्तिविधिविनियोगानां नामैन्द्र्या गार्हपत्यमित्यत्रापि शब्दसामर्थ्यमस्ति। कः स च न स्वरी स्यादित्यत्रापि चैन्द्र्याभिधान

धो ४

मित्यविशेष एव श्रुतिलिंगयोः प्राप्नोति तथाहि। श्रुतिविनियोगः हि न विना शब्दशक्तिं। न चैंद्रशब्दसामर्थ्यम
ल्लिखिता श्रुतिवर्जितं। सत्यमुक्तमप्यस्ति किंतु ऐंद्र्यां गार्हपत्यस्य नोक्तिशक्त्यावगम्यते। इंद्रोगत्वमतिश्चास्या नास्ति श्रुतिक
ल्पिता। पार्श्वैंद्र्या गार्हपत्यमित्यत्र पाशक्तिस्वरूपेतान्येव पदानि प्रत्यर्थं लोके विनियुक्तानि तमत्रैंद्र्या गार्हपत्यांगं प्रत्यायतया
शक्त्याच्यस्याविनियोगात्सुसामर्थ्यप्रवृत्तैस्सुब्रह्मण्यपदैः शक्य शक्यनोपह्नमंगत्वमतिधीयते। नन्वावसामर्थ्यं प्रथमं गृह्य
ते निर्दिष्टाभिधानाच्यश्चानुपपद्यस्यैव तस्य गम्यमानत्वात्तेन ज्ञाने विनियोगे शक्तिः कल्प्यत इति नासौ विनियोगकारणं य
द्यपि वस्तुतः प्रथमं विद्यते तथापि प्रमाणतः पश्चादुत्पत्तस्मृतिकारकहेतुत्वेन तत्पिज्ञापकत्वेनाकारणमित्युच्यते। यदि
पौरुषेयमिदं स्यात्तथा सति वक्तुरभिधानशक्तिज्ञानं विनियोगाभिधानात्प्रथमतरं स्यात्। न त्वेवमस्ति वेदस्यापौरुषे
यत्वात्तस्मात्सर्वपुरुषाणां प्रतिपत्तृत्वात्पश्चात्तरं शक्तिज्ञानमित्यक्षरश्रवणकृत एवायं गार्हपत्यांगत्वप्रत्ययः। कदाचन
शरीरमीत्यत्र पुनर्यद्यपीन्द्रशब्देनेन्द्रोऽभिधीयते तथापि विनियोगो नाभिधीयत इति श्रुतेर्व्यापारेण वाचकस्याविद्धस्य
श्रवणादिन्द्रस्य शेषित्वं मंत्रस्य वा शेषत्वं प्रतीयते यथेतरत्र विहितायाः श्रवणाद्गार्हपत्यस्यैव हितत्वमस्याश्च तृतीयाश्रुत्या व

उ.शा.प्र. ग्णात्वं केवलं तु मंत्रस्याभिधानत्वं विधानं चोल्लयमपि निषिद्धं न तु मंत्रस्याप्रधानपूर्वकमेव सामर्थ्यकल्पनं। सत्यमे
वं न तु तत्र हि विनियोगस्याभिधानं। किं तु सामर्थ्याद्धि नियोगयोरपत्ता दृश्यते न च तावता विनियोगोऽभिहितो भवति। न
१५ च विहितो मंत्रस्याभिधायकत्वाद्ब्राह्मणवाक्येनाभिधानं। हि अर्थरूपमात्रस्याभ्यैव च तेन प्रथमं तदभिधाना शक्ति
:कल्प्यते अन्यथा तद्बलेन विनियोगशक्तिः कथं। यो हि यस्याभिधानाय शक्त इत्यवगम्यते। विनियोगे अथ सो शक्तो
न त्वशक्तो नियुज्यते। न तथा हि तृतीयात्सामर्थ्याद्धि नियोगः कल्प्यते न प्रथमात् प्रथमेन हि विनियोगनिरपेक्षमि
ष्टाभिधानमात्रं कृतमतः इह शो विवेकः प्रतिपत्तव्यः एकत्रासत्ति सामर्थ्यमं च शेषो भिधीयते। अन्यत्रा तु शेषत्वं सा
मर्थ्यं प्रतीयते। अविद्यमानमेवेष्टा गार्हपत्याभिधानसामर्थ्यमभिहितविनियोगविधानात्कल्पनीयं विनियोगक
प्रथममेव क्लृप्तः। इह तु सामर्थ्यं क्लृप्तमालोच्य विनियोगो विहितो विहितो वेत्येव कल्पनीयं वाक्ये पुनः अर्थं प्रति
न सामर्थ्यं न च शेषत्वं उपलभ्यते॥ केवलः पदसंघातः प्रत्यक्षमुपलभ्यते। कथं तावदेश सामाख्या यौगिकत्वप्रमाणां प्रक १५
रणक्रमसमाख्यानां विवेकः अज्ञान एवेति न दृष्टो न निरूपितः। तदेतत्सर्वं वाक्ये अवगमवेतं विचिन्त्यं च दृश्यते

नहि किंचिदपि वाक्यं शक्यसामर्थ्येनार्थाभिधानेन पदांतरसंनिधानेन वा विना विद्यते। विवेकस्तूक्तो दितः
क्वाचित्कस्यचित्पूर्वतरप्रतीतेस्तद्दर्शयति इहतावत्कदाचन शरीरमात्रेण न विनियोगोऽभिधीयते। न पदांतरसंनि
धेर्वा गम्यते। किं तर्हि तस्याष्टचीड शब्द इंद्राभिधानसामर्थ्याद्विद्यते शेषाणि च पदानि तेनैकवाक्यतां गतानीति सम
स्तोमंत्र ऐंद्र्यभिधानसमर्थो गम्यते सोऽपि चैंद्रः कर्मांगत्वात्तदभिधानार्ह इत्यस्य तस्य विवक्षितेन तत्र विधीयतामित्याये
ह्ना। गार्हपत्ये पुनर्विनैव मंत्रसामर्थ्येन विनियोगं ब्राह्मणमभिधत्तेऽतिचलाकलं चिंतयितव्यं। अत्र केचिदाहुरेवं
तर्हि लिंगवाक्येऽप्येतस्मात्प्रागयं ग्रंथः प्रयोजयितव्यः। अथवा नाचैकवाक्यत्वादिंद्रप्राधान्यमित्यादि। उक्तं च लिंगात्व
मभ्युपेतं चेदिंद्रोपस्थानं कल्प्यते। उतयत्रापि वाक्यत्वं कथंत्वयोर्विकल्पते। यत्र वाक्यद्वयमेतदित्युपपन्नं तत्रैवैत
द्युज्यते वक्तुं अथवा नाचैकवाक्यत्वादिंद्रप्राधान्यं गार्हपत्यप्राधान्यं चोपस्थानस्येति। तथा तु न यत्राप्येकवाक्यत्व
व्यापारनिराकरणमवकल्प्यते। अन्यथा तु मंत्रस्य लिंगविनियोगज्यत्वे पूर्वपक्षवादिनैवाभ्युपगते पुनस्तदनपेक्ष
मिंद्रोपस्थानमप्येकवाक्यत्वकृतमेवेत्याशंकानिराकरणमसंबद्धमेवस्यात्तस्मात्प्रमादादुत्कृष्टस्य ग्रंथस्यापक

३शा·वा·

१६ ष्यया स्थानं कर्तव्यं न त्ववश्यमेतत् दाहर्तव्यं ॥ न वत्स्येव हविर्ह्विनां परिचोदनानामध्येपरपरिचोदनापरिहारः को
ऽपि पूर्वपरिचोदनापरिहारः ॥ अपि च यदाऽथवा नात्रैकवाक्यत्वादित्युक्तं तत्प्रथममुक्तं । तदापि पुनरेवं तर्हि लिं
गवाक्येऽन्यत्र वाक्यग्रहणमसंबद्धमेव स्यात् ततो यथा व्याससमवस्थिते ऽनुपेत्य वादमात्रेण सर्वपक्षवादिने कत्व
लिंगात्वसुरूमतोऽस्य वाक्यत्वानुपपत्ति शेषमपनयामीत्येवमाह अथवा नात्रैकवाक्यत्वादिति । यद्वा ब्राह्मणागतमेवै
कवाक्यत्वमकारणं विपक्षत्रसंगान्मंत्रे पुरुकृत्वानि ति विचारयेयं । तत्र वाक्यं त्वेव देवेभ्यः गार्हपत्य मुपतिष्ठत इत्यस्या
लिंगयोर्य देवत्वाश्रुतौ या श्रुत्या शेषत्वमात्रमनवगतशेषिविशेषं प्रतीयते यत्तु गार्हपत्यमिति द्वितीयया किमपि
प्रति शेषित्वमात्रं न तस्य लिंगेन सह कश्चिद्विरोधः । पदांतरसंबंधेषु सत्ति यथार्थमेवैन्द्र्यः करणत्वं स्यात् तु गार्हप
त्यस्य वार्यां कांचिदाग्नेयीं प्रतिशेषित्वं सवे त्वरस्य संनिधानेन त्वनयोः ऽङ्गोपस्थानं वाधते तत्र वाक्यमिति । नैतदेवमि
ति । गार्हपत्याभिधानश्रुतिं तावदु [illegible] न्यस्यति । परस्परसान्निधानमपि हि श्रुतिरोपादियत्वात् ग्रक्यम विरोधेन नेतुं १६
॥ यदि तु गार्हपत्यशब्दो गृहपतेरयमित्येवमिंद्रमभिवदेधजसाधनत्वेन लक्षयेदग्निसमीपं वा ततो लिंगाविरोधे

म२

नैव तत्त्वे निश्चेतुमुपपद्यते। यतस्तत्रयं समुदायप्रसिद्ध्या निधेयापरित्यागेन वर्त्तते ततो विरुद्धार्थतत्त्वप्रतिपत्तिविरोधो। अ
थवा नात्रैकवाक्यत्वादिति विनिक्तिश्रुतिविरोधोपन्यासः यदि हि समस्तश्चार्थे वा तत्रोग्रार्थे वा हि नीयावदेत्ततोपि नै
वं विरोधः स्याद्यतस्त्वमीप्सितमत्वमाहतेन विरुध्यते लिंगविरोधस्तु प्रागुक्त एवैकवाक्यत्वव्यापारनिराकरणमात्रा
र्थमुपन्यस्यते। कथं पुनरयं यथोक्तेन न्यायेनोत्तयथा विरोधसंभवे श्रुतिलिंगविरोध एव परिगृह्यते।। न च वाक्यवि
रोधः। उच्यते। यथा शीघ्रप्रवृत्तित्वाल्लिंगाद्बाधिका श्रुतिः। तथैव विनियोगेपि सैवं शीघ्रं प्रवर्त्तते। यच्च शीघ्रतरं विनियुंक्ते
तस्यैव प्रतियोगिना सह विरोधो लक्ष्यते। न तु च श्रुतिमात्रं न विरुध्यत इत्युक्तं। कथं न विरुध्यते। यदा श्रुतिर्नियतत्वात्तेनोपश्रु
तिवाक्यसंबंधात्तेकः शेषशेषिरूपोन्यो विशेषणविशेष्यात्मकः। न च श्रुतिरेवं वदति वाक्यलक्षणस्य विशेषणस्यैवं विधत्वे
षशेषित्वमिति। लिंगं तु शेषशेषिसंबंधेनैव सह विरुध्यते न वाक्यगम्येन विशेषणविशेष्यभावेन। तत्र श्रुतिश्रुतिदर्भे हि न
वाक्येन यदा विशेषणविशेष्यभावः कृतः तदा श्रुत्या सह लिंगविरोध उपलभ्यमानो विचारयितव्यो यथा पदैवैन्द्र्येत्यत्र तु
नदैवतदर्थशास्त्राध्याये नेदमातिरिक्तः स्फोटोपस्थापितः स च लिंगगम्यो द्वयविरोधीत्येतत्प्रतीयते। तस्मात् श्रुतिलिंगयोरेवै

उ.शा.वा बविरोधस्त्वनुपपन्नो विचारः। किंतावत्प्राप्तं। सर्वप्रमाणानि तुल्यबलानीत्यवगंतव्यं। कुतः कस्यचिदप्यप्रमाणत्वेन
१७ शंकेरनवधारितं। न ह्यन्यापेक्षया तस्य मा शक्तिरपगच्छति। सर्वत्र प्रत्यक्षादावपि ह्येवं गतिः। प्रमाणस्वरूपं प्रमा
णानां स्वतश्च न च तत्र यत्प्रमाणं तत्प्रमाणाभासी भवति। यो पि तदाभासः सोपि नैव प्रमाणं भवति। नित्यं च प्रमाणाना
मप्येवं बाधेन प्रमाणस्य न च तत्त्वार्थस्य प्रामाण्यमस्तु पगतमबाधलक्षणत्वात्प्रामाण्यस्य। श्रुत्यादिषु च स्वस्वसम
स्ते स्वस्व विषये प्रामाण्यं स्थापितं। न चैषां विषयांतरसंचारो ऽस्ति येन दौर्बल्यमाशंक्येत। न चैतदुपपद्यापि तेषां ज्ञानमुत्पन्नं
शक्यं वेदितुं। न चोत्पन्नस्य स्वरसतः परत्वादुत्तरेण विनाशो। न च संस्कारापनयनं। स्मृतिहेतोः संस्कारस्य सर्वत्रानु
च्छेदात्। न चाप्युत्थानाख्यात्फलाद्वियोगः शक्यते कर्तुं। अनुष्ठानप्रत्ययस्य दृढत्वात्। तस्मात्सर्वं च तुल्यबलत्वाद्विकल्पः।
बाधस्तु यदि कल्प्येत विपरीतः प्रसज्यते। न हि सर्वमिव बाधित्वा परेषां जन्म लभ्यते। श्रुत्यादीनां हि पूर्वपूर्वशीघ्रशीघ्रतरं
प्रवर्त्तितेन पश्चात्तनस्यात्तदुपमर्दनेन वात्मलाभेन भवितव्यं। अतश्च विपरीतबाधप्रसंगः। किंच। श्रुत्यापि नाममर्थस्य १७
विनियोगो न कल्प्यते। न सामर्थ्यादि रूपं स्यादेकवाक्यादिभिर्विना। उत्पत्तिकाले यस्यान्यविषयं सामर्थ्यं वेद्यमवधृतं

नि ४

नतस्यतद्धिनियोगकालेपरावर्त्तयितुं शक्यते विनियोगस्तु सामर्थ्यानुसारीतियुक्तमध्यवसातुं। एवं यस्य येन सह सं
बंध एकवाक्यतया न विद्यते न तस्य तद्विषया शक्तिः कल्प्यते संबंधे सति तदन्यथानुपपत्त्यैव शक्तिसिद्धिरिति वाक्यम
बलीयस्त्वं तथा सर्वत्रैकवाक्यत्वमाकांक्षामूलं। अतस्तस्यानुपलभ्यमानायां तदेकांतेन प्रतीयेत तदसावेतुवेतदस्ती। नि
र्वृत्तरस्याविप्लावादाकांक्षात्मकं प्रकरणमेव ज्यायः। तद्विरोधिनी त्वयान्येन सहैकवाक्यतावगतिः साश्रांतिः। तथा सर्वा
कांक्षाः सन्निहितावलंबिन्यो भवंति।। नह्यसंनिहितमपेक्षितुं संबंधुं वा शक्यमतो यत्र सन्निधिस्तत्र सर्वमित्थि बलीयस्त्वं। म
मास्याद्धनः प्रत्यक्षमेव संबंधं वदति। तस्माद्विपरीतं बलाबलं। अथवा विरोधे सत्येतच्चिंत्यते नचेह विरोध उक्तलक्षण यत्रापि विनि
योगोपपत्तेः। अतः समवायेपि सर्वेषां प्रामाण्यमिति प्राप्तेऽभिधीयते। ऋत्वेर्थविप्रकर्षात्परं परमेषां बाध्यत इति कुतः। विनि
योक्त्री श्रुतिस्तावत्सर्वेभ्यस्तेभ्य समंता। धीमस्याः सन्निकर्षेण विप्रकर्षेणावस्थिता। यदि श्रुतिवल्लिंगादीनामपिस्वतंत्रं प्रा
माण्यमलविपक्षत्।। न तु एतदुपपद्यते। तेषां तु स्मृतिवत् श्रुत्यनुमानद्वारं प्रामाण्यं। श्रुतिरेव हि स्वैकं प्रमाणं। सानुग्रहणो
पाय षडङ्गानुरोधेन षोढावतिष्ठते। कथं पुनरेषां स्वातंत्र्येण प्रामाण्यं न भवति। उच्यते चोदनालक्षणोर्थो धर्म इति स्थापितं। त

भा चा थाचोक्तं शब्दमनपेक्षं स्यादिति। तत्र प्रत्यक्षगृहीतानि यान्यक्षराणि विनियुज्यन्ते साक्षाच्च गृहीत्वा तच्छ्रुतिरित्युच्यते। यत्र त्व
१८ विनियोजकान्यक्षराणि प्रत्यक्षेणागृहीत्वा विनियोजकाद्यर्थापत्त्या कल्प्यन्ते तत्र लिंगादीनि भवंति॥ तत एव सामर्थ्यविप्र
कर्षो भवति। ऐन्द्र्या विनियोगं प्रति श्रुतिलिंगयोः सहप्रस्थितयोर्यदा श्रुतेर्विनियोजकान्यक्षराणि स्वरूपेण तदा लिंगे
स्मरणसमर्थानि तत्तावदाक्षेपकरणान्नाताद्यर्थानुपपन्नस्या विनियोजकानि कल्पयितुमारभ्यन्ते तावदितरेण प्रत्य
क्षेण विनियोगः प्रत्यापितः। तस्मिंश्चावगते मंत्रोपि प्रकरणं प्रति निराकांक्षीभूतः प्रकरणमपि मंत्रं प्रति। तथा सति प्रक
रणाम्नानस्यान्यथाप्युपपद्यमानत्वान्नैन्द्रीविधानाश्रुतिकल्पनायामर्थाय सिद्धिः भवति। नच श्रुतिमंत्रेण विनियोगः सि
ध्यति। बहुधा वर्णितैचैतत्पुरस्तान्न यथा साकांक्षेवेदार्थे यत्कल्प्यते तत्रहेतोरदृष्टं किंनेयश्रुत्यनुमानव्यवहितः कथं वा चक्रे स्व
कवाक्यत्वादिहावहार्यनामसतोः कल्पयित्वा विधाशक्तिं श्रुतिः पश्चात्प्रकल्पते। सर्वत्र हि मंत्रकिंचिदेव पदं कर्मसमवे
तमर्थं वदति। यथा भयेजुष्टं निर्वपामि इत्यग्निं निर्वपामि पदे शिष्टानि तत्समवेतार्थाभिधायित्वादप्रयोगाहाणि संति इत्थम १८
मानेकवाक्यतान्यथानुपपत्त्यानुमितसामर्थ्याभिधानानि संतिष्ठार्थमुपसर्जनीकृत्य तद्विशिष्टसमवेतार्थप्रकाश

ताददिति। तस्मात् श्रुतिर्बलीयसी। न हि तस्याः किंचिदन्यदपेक्षणीयमस्ति। यथा लिंगस्य श्रुतिरेवं प्राह वा नापेक्षणीयमस्य यत्रास्ति तत
स्माद्बलवाच्छ्रुतेत्॥ यः पराधीनवृत्तिः स्वतन्त्रात् बाधं कथमाचरेत। श्रुत्यादीनां हि पूर्वं पूर्वं उत्तरोत्तरनिरपेक्षं प्रवर्त्तमानं बलवत्तरं भवति।
परं परं तु पूर्वाधीनप्रामाण्यं न शक्नोति तस्य बाधं कर्त्तुं॥ न हि श्रुतिमननुमाय लिंगादेः प्रामाण्यमध्यवसीयते। ननूक्तं न चै
तदप्युक्तं नाम समर्थं विनियुज्यत इति। सत्यमुक्तं। अयुक्तं तूक्तं। अतः न श्रुतेर्विनियोक्तृत्वं लिंगादीनां प्रतीयते। विज्ञाते विनि
योगे तु तद्वशात् शक्तिनिर्णयः। विनियोगो ह्ययं कालं हि कथमेतत्साधयिष्यतीत्यपेक्षितेऽयं यथाशक्नोतीत्यवधारणात्क्वचि
त्तत्र यद्यपि स्वरूपेणातद्विधया शक्तिर्न दृश्यते तथापि विनियोगदर्शनादेवानुमीयते। ननूक्तं वचनात्वयथार्थमिन्द्रीस्यादित्य
त्र। न तु च प्राग् विद्यमानसामर्थ्यस्य विनियोगो न संभवतीति पूर्वतरं सामर्थ्यमनुमातव्यं। ततश्च प्रत्यक्षा लिंगात्तु दुर्बलता
पत्तिः। सत्यं पूर्वबलावित्वेन तत्कल्प्यते न तु पूर्वमवगच्छ्यते न ह्यविनियुक्ताया ऐंद्र्या गार्हपत्याविधानसामर्थ्यप्रतिपत्तिका
रणमस्ति॥ निर्वृत्ते विनियोगात्त्वन्यथानुपपत्त्या पूर्वमपि विद्यमानं सामर्थ्यं देवानुमीयते। न त्वेवमपि तुल्यार्थविप्रकर्षः। तथा
हि विज्ञेयोपायवत्ता लिंगस्यानुश्रुतेरनुपायकं। लिंगानुमानक्लृप्तायां तावत्तेव श्रुतावपि॥ सर्वथा ह्यदृश्यमानानुमानेन प्र
त्ययविप्रकर्षो भवति। तच्चोभयत्रापि समानं॥ सत्यमेतावत्समानं॥ न तु तद्बलाबलं प्रत्युपयुज्यते। अतः विनियोगान्निश्चि

बा॰ ३ तस्य दूरत्वाद्दुर्बलत्वं श्रीतत्वत्र पूर्वानुमायां स्याम्नोत्र स्वकल्पं चन ॥ लिंगे हि ग्रामला विना श्रुत्यनुमानेन विना विनि
१९ योगा ॥ तिधानालावादूरत्वं भवति ॥ श्रुतौ तु न रवगतो विनियोगाभिधानेयस्मादेतदेवं तस्मान्नूनं किमपि सामर्थ्यमस्ती
ति पश्चाद्वर्तमानमनुमानं न विनियोगप्रत्ययविक्षेपं करोति ॥ सहप्रस्थितयोर्हि प्रमाणयोर्येन विनियोगमध्ये शंचिरेण
प्रामित्तिर्भवति स विक्षेपो दौर्बल्यकारणं भवत्यवधारितं तु विनियोगे यद्यपि पश्चादनुमानं सहस्रं भवति न तथापि किश्चिद्वि
कर्षः ॥ एतेन लिंगवाक्यादियुगलानि व्याख्येयानि ॥ सर्वत्र हि पररस्य पूर्वमननुमाय विनियोगानुपपत्तेः पूर्वेणावरुद्ध
ते विनियोगे परस्य शंतरीयकसद्भावमात्रकल्पनमिति प्रतिपत्तिराहा ॥ श्रुतेस्त्वावश्यकत्वात्पदत्वेन लिंगादली प्रस्त्वंयुक्तमय
लिंगवाक्यादीनामनुमीयमानश्रुतित्वाविशेषे सति किंकृतं बलाबलमिति तत् उच्यते ॥ एकद्वित्रिचतुःपंचवस्त्वंतरयकादि
तां श्रुत्यर्थप्रतिवैषम्यं लिंगादीनामपीष्यते ॥ श्रुतिमात्रानुमानांतरितो हि लिंगस्य श्रुत्यर्थः ॥ वाक्यस्य तु न लिंगश्रुत्यनुम
नव्यवहितः कथं वाक्येनैकवाक्यत्वादिहानुव्यविनां सतां ॥ कल्पयित्वा विधाशक्तिं श्रुतिः पश्चात्प्रकल्पते ॥ सर्वत्र हि मंत्रे
किंचिदेव पदं कर्मसमवेतमर्थं वदति ॥ यथाग्नये ॥ [illegible] ग्नये जुष्टं निर्वपामि इत्यग्नि निर्वपामिपदे शिष्टानित्वसमवेतार्थानि तेषा १९
पित्वादसंयोगाद्दीपि संति हश्यमानैकवाक्यतान्यथानुपपत्त्यानुमितसामर्थ्यानि विधानानि संति प्रार्थक्षुपसर्जनीकृत्य तत्पूर्विपसमवेता
र्थप्रक॰ ॥१

व२

नेन प्रयोगार्थत्वं प्रतिपद्यंते। ततश्च श्रुतिमनुमाय विनियुज्यंते तद्वा विरोधे सति सर्वमप्यनुज्ञायते॥ यद्यप्युच्यमानैकवा
क्यत्वयोर्मंत्रयोः पृथक्प्रत्यक्षकाशयितव्यार्थौ क्रमसमवेतौ दृश्येते तत्र द्वयोरपि लिंगेन प्रकाशकापेक्षणात्प्रकाश
कयोश्च प्रकाश्यापेक्षणान्न विनियोगाय शक्तिसंप्रतिपत्स्यपचच्छेदसामर्थ्यमत्र वशी॥ उत्तरंगप्रसुवन्नाद्युचे कवाक्यतया वे
तुं शक्यते नाथवेत्यस्य च वागच्छ इः स्योवकाशंसद्दाति। कथं। एकवाक्यतया यावत्सामर्थ्यमनुमीयते। सामर्थ्येन श्रुतिश्चाव
तुकल्प्यते विनियोजिका। समुदायो हि विनियुज्यमानेनावयवावत्र विनियुज्य विनियोक्तुं शक्यते। तत्र पूर्वोक्ते द्वयोर्लिंगयो
रेकवाक्यत्वं प्रत्यक्षं नैकार्थाभिधानसामर्थ्यं विनार्थाभिधानसामर्थ्यप्रत्यक्षदर्शनात्सिद्धं। तत्र समुदायावयव विनियो
गाय वाक्यसामर्थ्ययोः सहप्रस्थितयोः समर्थविनियोजंगासंतवा यावद्वाक्येन स्वदेव्या गच्छतरार्थाभिधानसमर्थं त्वरो वाक्यं
समर्थमित्यनुमीयते। तावत्प्रत्यक्षलिंगवर्तिना सामर्थ्येन स्वदेव्यापि स्वार्थे परस्यापि स्वार्थे विनियोजिका श्रुतिरनुमिता भव
श्रुया द्वितरत्र श्रुत्यनुमानाय प्रवृत्ते। तावदिह विनियोगे सिद्धे निराकांक्षत्वात्प्रकरणाम्नानस्य न कश्चिदपि हेतुरश्रुत्य
नुमानमप्युपजातमूलो विनियोगो बाध्यते। मंत्रस्यापि हि स्वदेवस्य स्वदेवार्थे संशी॥ द्वं विनियोगमुत्तरस्य विरोधात्तयोरुत्तरोत्तरस्य

३शावा॰ शीघ्रं। पूर्वस्य चिरेण। शीघ्रं विनियुक्तश्च मंत्रश्चिरं विनियोगं नाद्रियते। तथार्थोपि प्रथममवगतमंत्रावरुद्धो नेतरं गृह्णाति
स्वप्राधान्येव संलवति न परोपसर्जनत्वं प्रतिपद्यते। तस्माल्लिंगं बलीय इति लित्वा वाच्यं नियोग इति। नचैवं श्रुतिनिर्वर्त्यामीत्या
२० दिना क्रमसामर्थ्येन शीघ्रतरप्राप्तेनावरुद्धे र्थे विप्रकृष्टप्राप्तानां स्वस्य स्वत्वेत्यादीनां बाधाद विनियोगः प्राप्नोति॥ नचैषां लि
ङ्गप्रयोजनत्वात्समुच्चयः तथा सत्ये कथाकाल्यालावादवश्यं चैतेर्थ्याः कथंचिन्निर्वाप एव प्रकाशयंतीत्यितव्याः ८ च्यच्यप्रका
शने कर्म्मानिंगत्वप्रसंगात्। अतः समानविषयत्वात्समवाये सती वाक्यप्राप्यपदांतरस्वाधेन न भवितव्यमिति। अत्रोच्यते। प
दांतराणि यत्रार्थं वदेयुः कर्म्मवत्तिनि॥ तत्रैवमितरेषां तु वाक्यमप्यगतेर्वरं॥ यानि स्वसमवेतार्थवचनानि तानि यद्धिष्वतं
त्रीक्रियंते। ततोनर्थकानि भवंति। तेन क्रमसमंतं वैधैर्निराकांक्षीकृतोप्यर्थ इतरेषां याकांक्षा त्वा स्वनस्वप्रकाशत्वं प्रतिपद्य
ते॥ यथा प्रकरणापूरितानामपि क्रमेण पुनर्द्धर्म्मप्राप्तिर्भवति। यथा प्रकृतौ निराकांक्षीकृता धर्म्मा विकृतौ निमित्तप्राप्तिं तथा क्र
मो व्याख्यातं॥ तस्मादेव मादी च्यपि संवध्यंते येषां तु प्रकाशत्ये स्पैतेषाम् न निर्धेयेन संवध्यमानानामप्यर्थवत्त्वाद्वीति नानर्थक्य २०
निमित्तमवकाशं लभंते। सर्वेषामेव श्रुत्यादीनामानर्थक्यप्रतिहतानां दुर्बलेरपि वाध्यत्व मिष्यते॥ तद्यथाज्ञीघ्रादीनां प्रोक्त
र्थं॰ समनमेनोद्दस्य२

णादीन्प्रतिश्रुत्याशेषित्वंप्राप्नुवदथतल्लिंगात्प्रकरणात्स्यापूर्वसाधनत्वकृतःसंबंधोवगच्छति।तेनावच्छिन्नंवाक्या
ल्लिंगस्यवलीयस्त्वं॥तथाचस्त्रातुवाकेदर्शितं॥वाक्यप्रकरणयोःप्रकरणमर्थविप्रकर्षात्दुर्बलं।तथाहिप्रत्यक्षासंगति
र्वाक्येनचप्रकरणेस्मिन्सो।आकांक्षातोनुमातव्यातावतात्विप्रकृष्टता।प्रकरणेहिद्वार्थपरिच्छिन्नानामंगांगिवाक्यानामुप
कार्योपकारकत्वाकांक्षामात्रंदृश्यतेवाक्येतुप्रत्यक्षःसंबंधः।तत्रसहप्रश्रुतयोर्यावत्प्रकरणानैकवाक्यताकल्प्यतेता
वद्वाक्येनालिंगानसामर्थ्यं।यावदितरत्रवाक्येनसामर्थ्यंतावदिहसामर्थ्येनश्रुतिस्तावदितरत्रसामर्थ्येनश्रुतिर्यावदित
रत्रसामर्थ्येनश्रुतिस्तावदितरत्रश्रुत्याविनियोगोसिद्धिरितिविच्छिन्नायामाकांक्षायांश्रुत्यनुमानेप्रकल्प्यमानावाक्यहतेकलि
तमपिशेषत्वंनिष्फलत्वेमगत्यांतरेवविलीयते।तस्माद्वाक्यंवलीयः।तथाक्रमप्रकरणयोःक्रमस्यार्थविप्रकर्षःकथं।आकां
क्षातःप्रभृत्येकंश्रुत्यर्थप्रतिगच्छति॥तामपिलब्ध्वातोलक्ष्योश्रुतिरेकस्यकल्प्यते॥क्रमोनामनिरपेक्षाणांमतांपाठानुष्ठान
देशसामान्यमात्रं॥यदित्वाकांक्षाभूतःसंनिधावाम्नायेततःप्रकरणमेवस्यात्द्वत्त्वप्रायेणमहाप्रकरणोपनिपातिन्योविकृत
यजुदाहरणं॥ताश्चहियत्याकृतांगमध्यपातित्वेनोत्पन्नंतत्त्वेवसत्वपरस्माद्वावच्छिन्नंक्रमलाभलवति।प्रकरणस्यक्रमोपर

शा.भा. कारैः श्राक्तैर्व्यवर्त्तितत्वात्। तत्र यन्निवृत्ताकांक्षस्य कस्यचित्समीपे पठ्यते। न्यस्य वाकांक्षावतस्तदुल्यस्यां शुश्रमाणं ग्रा
वत्क्रमवतो निवृत्तांमतीमाकांक्षामुपजनयति॥ तावत्प्रकरणाद्वता महैकवाक्यतां गच्छति। यावच्चेतरस्यैकवाक्यता न भव
२१ ति। तावत्प्रकरणिनं प्रत्युपकारसामर्थ्यकल्पना। यावदितरत्रासौ तावदिह श्रुत्यनुमाने। यावदितरत्र श्रुतिरनुमास्य
ते॥ तावदिह सिद्धे विनियोगेनुमानवीजहारेना क्रमश्रुति सर्वमप्रमाणीभवति। तथा क्रमसमाख्ययोः। क्रमे वेदक
ल्पितमेवांगानि नोद्देशसामान्यान्निमित्तं परस्परस्य पर्युपस्थानं। सर्वं च हि केनचिद देशेन संबंधो वकल्पते न च समाख्या
न वतः किंचिद्देशसामान्यं क्रमवदुपलभामहे। येन संबंधालिङ्गुस्यं संलदेः ननु च समाख्या संबंधमेवाभिदधाना प्रवर्त्तते श्रु
श्रुतितुल्या प्राप्नोतीति नैतदेवं। श्रव्य एव हि संबंधः कल्प्यते यः समाख्यया। अत्र त्वशेषशेषित्वं यच्छुत्या प्रतिपाद्यते॥ अर्थो नाम
यमं केनचित्प्रकारेण नवगानसंबंधानां समाख्याः प्रवर्त्तन्ते। सा च शेषशेषित्वं तावन्नैव प्रतिपादयति। येनकेनचित्संबंधेनोप
पद्यमानत्वात्संबंधमात्रमपि नैवाभिधत्ते। नहि यौगिके संबंधो लिधीयते स्वशब्दैः समाख्यान्यथानुपपत्त्या त्वनुमीयते। संबंधमा
त्रस्य चेतद्रूपं किंचिदलिङ्गमेषामस्तीत्यवगमः तत्तथा प्रसन्नं क्रममुत्कृष्यत्वं। नहि किंचित्प्रसामान्यमनुमातव्यं देशसामान्य २१

स्य प्रत्यक्षत्वात्। इह तु तत्पदस्याप्रत्यक्षत्वादानुमानिकत्वमिति विप्रकर्षः। समाख्या हि यावत्किंचित्सामान्यमस्तीति
कल्पयति तावत्क्रमेण तु न मनयोः काचिदपेक्षा। स्थाने तु समानदेशे पठिताविति प्रकरणं कल्प्यते। यावच्च किंचित्सामान्य
मपेक्षां कल्पयति। तावदितरत्रैकवाक्यता। क्रमात्स्थानाद्यावदिहैकवाक्यता भवति। तावदितरत्रोपकारसामर्थ्यसिद्धिः। या
वच्चेहोपकारसामर्थ्यकल्पना। तावदितरत्र श्रुतिरासादिता। ततश्च यावदिह श्रुतिमनुमातुमुपक्रमते तावदितरत्र वि
नियोगसिद्धेर्निराकांक्षीभूते प्रकरणपाठे सर्वमेतत्प्रतिपत्तिमध्यपरिपन्थिविच्छेदाद् मूलस्येव लूनं निर्बीजं भवति। तस्मा
दर्थविप्रकर्षात्तु परं परं बाध्यत इति सिद्धं। आह ननु श्रेण्यारोहणाद्यं आक्षिमात्रोपपादितं। एकमेव फलं अनुष्ठानाव
रोहतो यदा। एकस्मिन् यानवर्त्येकोल्लमिश्र आपरस्तयोः उभयोश्च जन्मतुल्यः प्रतिबन्धश्च नान्तरा। विरोधिनोऽसंदेको हि तत्फलं
प्राप्नुयात्तयोः प्रथमेन गृहीते तस्मिन्नप्रभूमोच्यतरेणुधा। तेन यद्यपि सामर्थ्यं प्रत्येकमिह समत्वदा। तथापि युगपद्भावे जन्मय
स्यानिराक्रियः। अन्यथैव हि पूर्वं ह दुर्बलेन परिवर्ज्यते। अन्यथा च न वस्तुनः सर्वशक्तिक्षयेऽसति। तस्मान्नैतदालंबनं युक्तं यत्
कश्चिदुत्तरेषां प्रामाण्यमिष्टं तस्माद्बलवद्विरोधेऽपि तेन भवितव्यमिति। यत्तु प्रमाणान्तरासंवाद्यत्वेन प्रमाणमिति। तत्र ब्रूमो

माली तत्र कदाचन । अ- अत्र दृष्टमेतच्च समारोपेण कार्थितं । नाहि यथाहि विषयेवाधस्तत्रैव प्रमाणत्वं १

शा-वा यमपि प्रामाण्यमास्ताम् एवं कथं नैवैतेषां प्रमाणत्वं किं तर्हि प्रदेशान्तरे केवलानामुपलब्धितं सामान्यतो दृष्टरूपेण ज्ञापयितुं तिला
ति । तच्च वलीयसा पद्धतविषयत्वात् सीदतीति पश्चाद्भाविना तेनाध्यवसीयते । अथ वा यत्र ज्ञास्यत्यापादश्रामीन्नमिहापि श्रु
२२ मत एव मतुज्वक्वनान्येन विषये पद्धते मूलच्छेदाद्यं दूतं न गच्छति । तत्किं क्रियतां । तेन श्रुगत्ते दिव्यदेवाद्याद्यप्रमाणमेववा
ध्यते । अनुत्पन्नमेव चेह श्रुत्यन्तावाच्छेपज्ञानं वाध्यते अन्तरालिकज्ञानमिथ्यात्वकल्पनयेति नो त्वन्निसासाध्येन तुल्यबलत्व
मतश्च कालसंकोचच्छेदना दिक्षयो वाधो नैवाशंकितव्यः । यो विरोधोत्पन्नवाधः तमपि फलवियोगात्मनोपपादयिष्यामः ए
इयो वं तावद्वयोर्विरोधे रूपणादिर्वाक्यसामर्थ्यादानन्तर्यसामानाधिकरण्याभ्यामेकहायन्यादिशेषत्वं प्राप्नुवच्छ्रुत्या श्रुत्या अ
यसंबंधित्वेन विज्ञायते द्वितीयसोपानस्तारोहकयोरिव स्वयावद्वाक्यं सामर्थ्यं कल्पयति ये तावच्छ्रुत्याविनियोगः कल्पित
इति महदन्तरं । श्रुतिप्रकरणयोर्विरोधे प्रकरणादेकविंशत्यामनुवचनानां दर्शपूर्णमासांगत्वे प्राप्ते श्रुत्यैव प्रतिष्ठाकामादि
अनुरूपार्थविधानात्मकरणाबाधः ॥ अनुवचनानां च क्रियात्मकत्वादितिकर्तव्यतारूपत्वात्प्रकरणग्राह्यत्वे न तर्हि रोधो २२
दाहरणत्वं । तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति तु द्वादशत्वस्य क्रियात्वादितिकर्तव्यतात्मकत्वे सति कथं लावरूप

वर्णितं सर्व विद्यात्तु श्रौतमाकारेणोत्तरे लक्षणप्रदर्शितं च्या व्यावृत्तिलिस्वेवंप्रपंचयितव्यं यथा श्रुतिवाक्ययोर्विरोधे ५

प्रकरणाग्रहणत्वानुपपत्तेः सन्निधिमात्रेण प्रकरणकल्पनापूर्वकसंबंधाध्यवसानाच्छ्रुतिस्थानविरोधोदाहरणत्वं शुक्रमि
त्येके। तत्तु नैवमाश्रितं। कुतः। यदि द्व्यग्रता संख्यात्वतंत्रावालवेदियं। नेच्छं लावे न गृह्येत क्रियारूपेणावर्जनात्। इतिकर्तव्य
तां शक्तां येनोद्दिश्योपसत्क्रियां। द्वादशत्वविधिक्षिप्तेन कथं लावे न गृह्यते। इहापि च कथं सा च विनियुक्तोपसन्नता। यावत्संख्यै
कवाक्यत्वमासमर्थ्यं कल्पयिष्यति। तावत्पत्यस्तया श्रुत्या बध्या हीनां गतां गता। नैव च्छहर्गणे दृष्टा द्वादशाह्या हीन उच्यते। श्रु
तिक्रमविशेषे किमुदाहरणमिति। उच्यते रशनाधर्म्मा दर्शमय्यादयः क्रमात्। अग्नीषोमीयशेषाः स्युः क्रत्वपादृष्टपांगताम्
ताः। एतद्यूपपरिव्याणशेषो हि रशनाश्रुता। सहधर्म्मैर्न साध्यातिक्रमेण पशुशेषतां। यावत्प्रकरणादीनि तस्याः कल्पयति
क्रमः। तत्तु निर्व्यवेतसैत्वा श्रुत्या तावत्प्रजायते। आकांक्षामाचमे वैकं यावत्कल्पयति क्रमः। हरेण तावद्दध्यामां रशनो हरति श्रु
तिः। श्रुतिसमाख्ययोर्विरोधे किमुदाहरणं। पौरोडाशिकमिति समाख्यातदर्शपूर्णमासमकांडपठितो मंत्रः साधारणप्रकरणाव
र्त्तमानः क्रमेण चाहुत्मीलितलिंगेन विनियुज्यमानः पुरोडाशस्यैव वा प्राथम्यात्या मुवन्नश्रुत्या सांनाय्यार्थशाखांगत्वेन वि
धीयते। इषे त्वेति शाखां छिनत्तीति। तत्रापि यावत्समाख्यया किं चित्सामान्यं कल्प्यते तावच्छ्रुत्या विनियुक्तत्वात्प्रकरणवाक्य

भावा॰ सामर्थ्यश्रुतिश्च कल्पितास्तीत्येव बाधः। एवं लिंगस्य प्रकरणादिविरोधउदाहर्तव्यः। तत्र प्रकरणविरोधेतावत्पूषानुमंत्रण
२३ मुदाहर्तव्या नियाज्यश्च प्रकरणे नैकवाक्यत्वं कल्प्यते तावल्लिंगेन श्रुतिस्तथा यावदितरस्य प्रकृत्ताभ्यादिप्रकाशनसामर्थ्य
तावदिह विनियोग इति बाधः लिंगक्रमयोर्विरोधः। स्तुतशस्त्राधिकरणे दर्शितो यथैन्द्रप्रकृष्टेते तिष्ठितोपहरणमपि
थाभ्यनुज्ञापनान्यनुज्ञयोः प्रज्ञातक्रमपाठरूप हूतउपह्वयस्वेत्येवं मंत्रावाम्नातौ तौ देशसामान्यात्तत्रैवांगतया प्राप्नुत
ः उपहूतइत्यनुज्ञातो उपह्वयस्वेत्यनुज्ञायां।। न तु तथा सामर्थ्यमस्तीति विपरीतं शेषत्वं। यावद्धि स्थानेन प्रकरणमुत्या
प्यैकवाक्यत्वं कल्प्यते तावल्लिंगेन श्रुतिकल्पयित्वा सा क्षिप्तो विनियोग इत्यकल्पितलिंगश्रुतिपदस्यैव क्रमस्य बाधः। तथाप
विव्याणाकरणक्रियमाणानुवादिनोः पाखीरमिसुवाखुवामा इति चाग्नीषोमीयपरिध्याणांगत्वे प्राप्ते लिंगात्सवनीय
र्थत्विती यपरिध्याणांगत्वमिति।। कथं तर्हि न मनोताग्नीषोमीयक्रमबाधनसमर्थेन लिंगेनाग्नेयसवनीयपशुयागांगमि
ति चेन्न वचनात्वयथार्थमिडीस्यादितिवत्तवलत्वरश्रुतिकृतविनियोगकल्पितलक्षणाद्वारेणाग्नीषोमीयां मत्वा देवेषा
हायपघथच्छदेवत्यः प्रशुराग्नेय्येव मनोता कार्येति। अनया हि श्रुत्या लिंगेनोत्कृष्यमाणा मनोतावारिता हि देवत्यैव न केवा २३

प्येकदेव।

नाग्निदेवत्यत्वेनाग्नीषोमीयादुत्कर्षणीयेत्यर्थः। यद्यैकारंभकस्थानाद्रपनीयस्य यथाक्रमं काण्डैकत्वं च संयोजना कार्येत्यव
धार्यते। लिंगसमाख्याविरोधे लत्वात्तु वाक्येयुहणादिवाक्यानि समाख्यानाद्रूद्राणत्वेन संबंधमाप्तमाख्यादिकल्पनय
नद्रांगत्वविनियोगाय प्रवृत्तानि लिंगेन ग्रहणोवेदानामपकृष्य जरणोऽग्निविनियुज्यंत इति स्थितं।। याज्यासमाख्याबाधेन
च मनोर्न्यूचां पृथुयाज्ञवल्क्योऽस्य लिंगेन सामिधेनीत्वे विनियोग इत्युक्तं।। वाक्यक्रमयोर्विरोधे परिश्याछ्येगाकरणं कि
यमाणानुवादिपरिवीतमसिपरिवीतपदव्यतिरिक्तपदानामुवासुवा साछ्या गात स ७ छे यानित्येवमादीनां लिंगविनिषु
क्तपरिवीतपदैकवाक्यत्वात्सवनीयपरिध्याणे विनियोगः। वाक्यसमाख्ययोर्विरोधे लत्वात्तु वाक्ये एव सथ्यासमित्यु
वपादिग्रहणादेविनियुज्यमाने छत्तेकवाक्यत्वगतशेषपदाहृत्निरूदाहर्तव्या। तथाध्वर्यवादिसमाख्यानात् ज्यो
तिष्टोमादि प्रधानेष्वतदर्थे छेदधा युवत्तु स्वर्गकामो घेकवाक्यत्वाद्दर्थमात्रविषयत्वं विज्ञायते। ननु श्रुतिरेवैषालवन्नाश्च
कस्य विकल्प्यस्य श्रवणादेतद्विज्ञायते लिङ्गाकर्तुरननिधानात् किंतर्हि पदद्वयसंनिकर्षादेवैतद्वन्नणाया सामानाधिकरण्या
द्वगम्यते। तस्माद्वाक्येनैवसमाख्याबाध्यतइति। प्रकरणसमाख्ययोर्विरोधे पौरोडाशिकसमाख्या तत्राह्मणाम्नातानांपप

भा॰वा जादीनां प्रकरणाम्नानाग्न्योपांशुयाजार्थत्वमित्युदाहरणं॥ एवं त्वाद्येकस्य शेषस्यानेकशेषिसंगं प्रतीनीयमानस्य वि
रोधउदाहृतः॥ एतयेव दिशानेकस्य शेषस्यैकशेषिसंगं प्रतिनीयमानस्य विरोध उदानीमुदाहर्तव्यः॥ तद्यथा श्रुतिलि
२४ गयोर्विरोधे ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति मंत्रकरणकव्यापारविधाने कृते लिंगात्कस्मिंश्चिदाग्नेये मंत्रे शेषत्वेन प्राप्नु
वति श्रुत्यैन्द्री विनियुज्यते न तदवरुद्धे चोपस्थाने नेतरस्यावकाशो विद्यते॥ श्रुतिवाक्ययोर्विरोधे यज्ञायज्ञीयप्रगाथेकत्वाक्य
त्वत गिरापदश्राव्यविरोधप्रदर्शनमुदाहरणं॥ तथा विश्वेषां देवानां श्रुत्या मिश्रे वशेषो हि तेषां वाक्येन वाजिनं॥ तत्कृद्व
लप्रमाणत्वात्तया श्रुत्या निराकृतं॥ श्रुतिप्रकरणयोर्विरोधे प्रतिष्ठाकामदर्शपूर्णमासप्रयोगे प्रकरणात्पंचदशसम्य
सामिधेन्यनुवचने ह्रत्वेन प्राप्तेऽश्रुत्यैकविंशतिसंख्यानुवचनांतरं गत्वावगमात्प्राकरणिकनित्यानुवचनसंख्याबाधः॥ श्रुति
क्रमविरोधे पशुकामप्रयोगे स्वक्रमेणावसांगता॥ श्रुत्यौद्गोदोहनादेर्वचुमसस्य निराक्रिया॥ श्रुतिसमाख्याविरोधे वाजपे
यः समाख्यानात्प्राप्तोऽध्वर्युकर्तृकः श्रुत्या ब्राह्मणकामस्य तु तथाध्वर्योर्निराक्रिया॥ तथा च यजमानस्य याज्ये त्युदाहरणं॥ २४
ऋतुयाजे हि होतृसमाख्यया होतुः प्राप्तायां यजमानकर्तृकत्वेन कर्तृसंबंधवाचिन्या षष्ठी श्रुत्या प्रतिपाद्यते॥ लिंगवा

विरोधे स्योनादेरपि शेषत्वं वाक्येन सदनं प्रति। सीदेत्यस्यैव लिंगेन तेनायं पूर्वबाधनः॥ तथा हि धारणे तस्मिन्सीदेत्यस्य विशे
षता। स्योनादेरेव लिंगान्न तस्मात्स परबाधनः॥ अनेकशेषिशेषत्वात्पूर्वमेतदुदाहृतौ। अनेकशेषसंबंधात्संप्रत्येकस्य शे
षिणः॥ सदेस्योनं ततः स्त्यादिसदने सामिधारणे॥ वाक्येनांगतया प्राप्तं लिंगाच्छ्रुत्वा निधारणे। तस्मिन्सीदेत्ययं वाक्यात्वास
ःशेषो निधारणे। लिंगात्तु सदनस्यैव तत्रैवात्र प्रयुज्यते। एकैकस्मिन्कशेषत्वं वाक्यात्प्राप्तं द्वयोर्द्वयोः॥ एकैकस्य तु लिंगेन
तत्र संप्रतिगृह्यते। एकस्मिन्नेव मार्गेत्तु यत्सैकाणि चतुष्टयं। अलाणिलाप्यनारेण विवेक्तव्यं तदात्मना। लिंगस्य प्रकरण
क्रमसमाख्याविरोधे निर्णयः। दृष्टलिंगेन देवस्य त्वेत्यादिना प्रकरणप्राप्तमंत्रांतरबाधः॥ प्रथमस्य काम्येष्टियज्ञस्य क्रमात्ता
म्नीधेनाकार्यप्राप्तस्य याज्यानुवाक्यायुगलस्य लिंगेन बाधः॥ समाख्यया मनोर्ऋचां सोमारो दृष्टेषु याज्यानुवाक्ये न प्राप्त
ना सोमरूद्रलिंगालिग्याज्यानुवाक्यासिर्वाधः स्वदाहरणानि। वाक्यप्रकरणयोर्विरोधे पूर्वेषु रमावास्यायां वेदिं करोती
ति उदाहरणं। प्रकरणेन हि हविर्धिवासनो धरकालयद्विधानं न स्पर्शग्रहणं प्राप्नोति। अमावास्यासमभिव्याहारेण तु प्र
ईषु ःन वाक्श्रुतिदिं। नहि समसमी शेषशेषिसंबंधं वदति यस्य विकरणात्वमभिधत्ते। तत्कर्मणो तु पपन्नमेव तस्मात्यदर्श

वी०३
२५

घ्र २

न्निधाने नैव संबंधः स च शीघ्रतरं भवतीति क्रमात्। वाक्यक्रमयोर्विरोधे किमुदाहरणं॥ ज्योतिष्टोमे काम्यनैमित्तिकेषु प्रतिपत्क
ल्पेषु प्रतीकग्रहणान्न्यादमात्रं श्रुत्या विनियुज्यते तत्र द्वितीयपादाम्नातिप्रथमसंख्याक्रमेण नित्यानामेव वर्षसंगमस्तथा द्व
धापवस्वधारयेति राजन्याय प्रतिपदं कुर्यादित्यत्र पवमानार्थं देवेभ्यः सिद्धे वैश्याय तत्र ऽस्येताववद्वितीयतृतीयोपादौ श्रुतः
वाक्यात्स्वमध्यवर्ते च मत्सरः विश्वादधानर्दुजसा इति॥ ननु विलक्षिलेदादस्य लिंगविरोधस्स्यात् नैषदोषः सर्वेषां सोमलिंगा
त्वाद्विलक्षिलेदेन त्वेकवाक्यत्वमेव नोपपद्यते॥ तथा च वेदाकांक्षापूर्वकमेकवाक्यत्वादि कल्प्यते तावदितरेणानंतर्या
त्समानविषयत्वात्सामर्थ्यादिकं कल्पयित्वा विनियोगः कृत इति क्लीबस्य॥ वाक्यसमाख्ययोर्विरोधे तस्मान्मैत्रावरु
णः प्रेष्यति चानुचाहेति होतृसमाख्याते प्रवचने प्रेषानुवचनमाम्नातं॥ तस्य कर्तृविशेषाकांक्षिणः समाख्यया हेतृशंसो
तिवाक्येन मैत्रावरुणः एकेन वक्तृतार्थस्य न कर्तृतयापेक्षा भवति॥ तत्र शीघ्रतरत्वान्मैत्रावरुणोऽप्रकरणकल्पनायाव
त्तद्वासासमाख्याबाध्यते। न चायं श्रुतिविरोध आख्यातपदेन कर्तुरनभिधानात् मैत्रावरुणपदेन कारकविभक्तिप्रयोगा
भावात्। क्रमप्रकरणयोर्विरोधे गिरापदे रापदएव सोऽपेक्ष्योदाहरणं· अग्निष्टोमसाम्नः क्रमेण गिरापदं प्राप्नोति· प्र २५

करणादिरापदं तत्र बलीयः श्रुत्यैव तु सामान्येनाग्नेयोदाहृतम्। प्रसीदित्यसंज्ञीर्त्त विषयत्वं प्रक्रियासमाख्ययोर्विरोधे तस्मा
न्मैत्रावरुणः प्रेष्यति चानुचाहेतितैदेव ज्योतिष्टोमप्रस्तुदाहरणम्। तस्य हि समाख्यया होतृकर्तृकं प्रैषानुवचनं प्राप्नो
ति। प्रकरणात्तु मैत्रावरुणकर्तृकं निर्णीयते। प्रैषानुवचनस्वरूपापेक्षं च शेषत्वं चोदाहरणमिति भेदः। क्रमसमाख्ययोर्वि
रोधे किमुदाहरणं काण्डयाज्याकाण्डाधीतयोरैन्द्राग्नयुगलयोः कलयोरपि विकल्पेन कर्मद्वयेऽपि प्रयोगः। समाख्यानुरोधेन प्रा
प्नोति। क्रमबलीयस्त्वात्तु प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमेवेति व्यवस्था। लिंगं तु पक्षद्वयेऽपि तुल्यार्थमिति क्रमसमाख्यायो
रेव विरोधः। एवं शेषैकत्वे शेष्यैकत्वे च श्रुत्यादिसमवाये यद्यपि तत्र यथाबलामर्थविप्रकर्षो द्विजातीयैः सह दुर्बलमेवं सजाती
येष्वपि यत्र हेतुसामान्यं तत्र दर्शयितव्यं। तत्र श्रुतेरेव तावत्सामान्यविशेषादिभावेन शेषविषयः समवायश्च प्रयोजनं बहु
हीकरोति। तत्र विशेषश्रवणादग्नीषोमीयादावपि प्रमुव दानेपंचतद्वेति तु विशेषश्रवणेन विशेषेऽवतद्वीकरणमुपसंक्षिय
ते। तथा शेषिसमवायेऽयदाहवनीये जुहोतीति सप्तमीश्रुत्या जुहोतिसामानाधिकरण्येनावस्थेयस्याहवनीयः श्रूयमाणो वि
शेषसंयुक्तयाः षष्ठ्यवस्थ्येनेत्यनयावाध्यते। संदिग्धासंदिग्धत्वेन च बलाबलविशेषो लक्ष्यति॥ एवं पौर्वापर्यविरोधेऽग

अ॰ शा॰ वा॰ गुणविरोधादिह्यपि श्रुतिर्ह्यप्रयुदस्त्वर्द्धयं। तथा पशुं गमेक्तव्यं पदश्रुत्याऽवतीयते। समानप्रत्ययश्रुत्या वलीयवलीयस्या
क्तिर्व्यां गत्ता। तथा धात्वर्थकर्मत्वे पदश्रुत्योपपादितेः। सा वनायाविधिश्रुत्याऽरुणार्थस्य साध्यत्ता। तथा लिंगद्वयविरो
२६ धे स्योनंतेसदनं कृणोमीत्येवोदाहरणं। हे हित्तत्र लिंगेपरस्यैकत्वाकृतागमनेसामर्थ्यात्मकमेकमर्थी विधानशक्तिरू
पमपरं। तच्च श्रुत्यनुमानस्य प्रत्यासन्नं विप्रकृष्टमितरद्वाक्यादपि जघन्यत्वादित्युक्तं साध्ये। वाक्ययोर्विरोधे पंचदशसा
मिधेनीरनुब्रूयात्। सप्तदशवैश्यस्येत्युदाहरणं। उभयत्रापि हिंसामानाधिकरण्यादेकवाक्यत्वेकृते विनियोगे सति
नि भिन्नविशेषसंयोगात्सामदर्श्यं वलीयोभवति। प्रकरणयोर्विरोधे अग्निकामं जुहोतीत्युदाहरणं। महाप्रकरणे
नूत्वस्य दर्शपूर्णमासार्थत्वात् तत्प्रकरणे न तु भूयान्त्यर्थता। तन्नैमीयसस्य हितत्वात्मस्तेन नु उत्त्ते महाप्रकरणसंस्पर्शेऽपि
वृत्तसंवाक्यस्थानीयः संबंधोवकल्प्यते। क्रमयोर्विरोधे काष्ठ एवयाज्याकांडयोर्व्यपर्ययप्रत्यासन्निक्रमेणतयोरैवैंद्राग्न
योर्युगयोरि[illegible]पि द्वयोरप्यनियमेनप्राप्नुवतोर्यथासंख्यक्रमेणात्वेतदेशसाधनप्रत्यासन्नत्वाद्विनियोगोभवतिस
माख्ययोक्तविरोधे सामान्यविशेषसमाख्ययोरध्वर्यवपदबाधो न विष्यत्ति। तस्योपदेशसमाख्यानेन निर्देशरुत्ति। शे २६

वली४

पिसमवायश्च प्रत्येकं विविच्योदाहर्त्तव्यः एवं तावत्प्रत्यक्षेषु श्रुत्यादिषु विचारितमेतयैव दिशाऽनुमानेष्वपि
सजातीयविजातीयसमवायो विचारयितव्यः। तत्र च प्रत्यक्षागम्यानामानुमानिकैरानुमानिकानां चानुमानिकैः
सह सर्वार्थेनैव मार्गेण सजातीयविजातीयबलाबलं व्याख्येयं। तद्यथातिदेशप्राप्ताः श्रुत्यादयः प्रत्यक्षैर्विकृतिश्रु
तिभिर्बाध्यंते विपरीतोऽपि चेह बाधो भवति। पूर्वपूर्वमपि ह्यानुमानिकं परेण परेण प्रत्यक्षेण बाध्यते। यथा कृष्णलेष्वनुमानम
र्थेनावघातः सर्व्वेष्वेव विषये च सामर्थ्यलिंगं न केवलं मंत्रगतमेवावगंतव्यं॥ तथा च प्राच्यप्रच्यार्थदर्शनाच्च न च्युग
ती नित्तेषामपि लिंगत्वमभिधास्यते। काण्डनरस्य लिंगस्य प्राशिरश्च्यायासंस्रवइत्यादि॥ यत्र पुनः श्रुतिरानुमानिकी
लिंगं प्रत्यक्षं तत्र कथं। यथा स्मृतिवैदिकलिंगविरोधे। तत्र स्मृतेर्मूलांतरमपि संभाव्येत न तु लिंगस्येति तदेव बलवदि
त्यनुसर्त्तव्यं। सर्वत्र दुर्बलस्यापि प्रमाणस्य बाधे यदि किंचिदनर्थकीभवति। ततो विपरीतो बाधो योजयितव्यः तदुक्तं व्रीहि
रूपोऽनंतात्पत्त्यश्रुतिमुत्सृज्य प्रवर्त्तसाधनत्वग्रहणमिति॥ तथा दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा तदा विपरीतत्वं
शिष्टाकोपे यथोदितं। सर्व्वप्रमाणानामेवार्थद्वारः परस्परविरोधः न स्वरूपनिमित्तः तत्र यदा पदार्थतद्धर्मविषये प्र

पि

शा॰दी॰ मातो विरुध्येते। तत्र यद्यपि प्रमाणतो न्याय्यं बलाबलं तथापि प्रमेयानुरोधेन तदाश्रयणात् स्वरूपदुर्बलेनापि बलव
२१ द्बाध्यमानं तदानुगुण्यं प्रतिपद्यते। तदुक्तमाचमनादयः पदार्थाः प्रत्यर्थीनां च गुणाः क्रामन्ति। तथा च लोके प्रत्यंतबल
वंतोपि पौरजानपदजनाः दुर्बलैरपि बाध्यंते प्रकृतैः पार्थिवाश्रितैः। एवं सूत्रे श्रुतिलिंगविरोधे पादनां तेच ताछ्व्या
ख्यातं। इदानीं लाघवशेषमनुक्तमिष्यामः। तत्र तुल्यबलत्वो किंश्चतः प्रामाण्य विस्रमात्प्रदेशांतरदृष्टं स्वरूपं तुल्यं द्व
योरपि। अत एव मंत्ररूपं दृष्ट्वा श्रुत्यनुमानमंतरेणैव विनियोगबुद्धिर्भवतीति श्रुतिकल्पनं। नहि विज्ञानस्य पक्षानस्य च
विशेषः उपलभ्यत इति॥ मंत्राम्नानवेलायामिंद्रार्थत्वं ज्ञातं श्रुत्युच्चारणकालेपि गार्हपत्यार्थत्वमित्युभययोः लब्धात्मनोर
विशिष्टत्वं। न ह्यविज्ञातरूपो मंत्रः श्रुत्या शक्योपि विनियोक्तुमिति श्रुत्या प्रथमं रूपनिरूपणं कर्तव्यमतश्रुतदेव धारण
वेलायामिंद्रोपस्थानप्रत्ययो जातो न शक्यो निवर्तयितुमिति मन्यते। ननु लिंगस्यलंगुरस्यैव रूपं सविचिकित्सो हीति॥
श्रुतौ दृश्यमानायामनुमानमंत्रवाङ्गुरत्वं सविचिकित्सो हीति सर्वविज्ञेपजद्यत्वान्नप्रसस्वतः प्रामाण्यमित्यभिप्रायः। प २१
दः पुनः प्रत्ययोत्पादनमेकांतिकं शङ्कीत्वा सविचित्संत्वं संदेहविपर्ययानध्यवसायानामत्यंतमभ्यमानस्याहो नेन

दैवं यतो लिंगाभास विचिकित्सा: प्रत्ययः। तस्य कृते श्रुतेनैव संप्रधारणात् स्त्रीति किं मिथ्यमेंद्रीलवृत्तिनलवतीत्यनिश्चितः। तस्य
कृत्यविरोधेथ प्रमाणत्वान्नैव तयासह बलाबलं चिंतायां। कृ लिंगमात्रं विचिकित्सए कांते तेनैव द्वैवत्योयं मंत्र इति प्रत्ययः श्रु
श्रुत्या सह तुल्या सह तुल्यबलत्वाद्विकल्पितुमर्हति। ननु वेकरूदाचिदिति। पूर्ववदेव नैव कदाचिन्निर्विक्षेप इति मन्यते
इतरस्तु श्रुत्यभिधेतमेवमविचिकित्सत्वे श्रद्धीत्वाह एवं च सति नैव लिंगं नाम किंचित्प्रमाणमस्य विषयादिति। सिद्धांतवादी
त्ववदतियदि मविक्षेप एत्य योत्पादमात्रेण कुपितलिंगस्य प्रमाणमेव युंचति। कामंमा भूत्प्रमाणं। भवति तु संशयो लिं
गपरिज्ञाते अर्थे श्रुतिः। कथं पुनः सविक्षेपत्वं पवित्यज्य संशय एवमविचिकित्सत्वं पुदाक्रियते कथं वा लिंगपरिज्ञात
त्वं मिहुवदलिधीयते। नैष दोषो लिंगपरिज्ञातत्वं तावदविरोधवेलायां निःप्रायं संदिग्धत्वं विरोधवेलायां। एतदुक्तं भव
ति यदविरोधकाले लिंगस्यावगतं विनियोजकत्वं तन्न तथैव सर्वदैवावतिष्ठते किं तर्हि संदिह्यते अन्यथा विरोधाद्विनि
योगोगीकृतः सह किं तथैव बलवत्पथकेन विद्यावतिष्ठत इति। यदि वा विस्पष्टमेवाप्रामाण्यमिति। तावदेव संदेहो भवति
यावत्प्रत्यक्षा श्रुतिर्नोपलभ्यते तस्यां तु सत्यामितरकल्पनानुपपत्तेरप्रामाण्यं। लिंगे हि सामर्थ्यमात्रं प्रत्यक्षेण चतावता

विनियोगउक्तो भवति नचानुक्तस्य क्रियायां प्रामाण्यमस्ति । यथा सत्यपि सामर्थ्ये विप्रराजन्यौ नवैश्यस्तोमेऽक्तः तस्मा

 न्मलिंगं विनियोजकमिति । परस्तु विरोधविषयमप्रामाण्याभिधानमज्ञात्वा सार्वत्रिकमेवेदमुक्तमिति त्वांतः प्रामाण्य

मार्गं दर्शयति । प्रकरणावृत्तोऽर्थस्य संनिधानेऽयमर्थमाम्नातीति । तदेतदपि वाप्रयोगसामर्थ्यान्मंत्रोऽभिधानेवा चास्य

दित्यपि वा विशिष्टस्मृत्या कार्यमित्यनुवर्णितं । अथवा मिह्यते वा हिनापि विरोधे सुखतरमप्रमाणत्वं वक्ष्यामीति मन्य

मानेन प्रथमं सूत्रं तंत्रमेव तावदप्रामाण्यं दर्शितं । तथा च कृतेष्वियमवैतस्य श्रुत्यपवमाने नह्येवं लिंगप्रामाण्यकल्पनमापत्स्यते ।

तत्रस्य सममसुजेयात्व विष्यतीति तेनैतरेण विरोधविषयमनाहृत्य प्रामाण्यं तावद्वक्ष्यामीति निरूप्यतुल्यबलत्वमभिहितं । अस्तु

पयाम्यापि बलाबलमविरोधादबाधः । तद्यथोपदेशातिदेशाभ्यां प्रयाजाद्युपकारस्य प्रकृतिविकृत्यर्थत्वादविरोधः स हि

ष्टुतस्यासकृत्करणं विरुद्धमिति चेन्न प्रधानानुरोधेन गुणावृत्तेः सर्वत्रैकत्वादैंद्रशब्दस्य गार्हपत्ये गौणत्वादवयं प्रसिद्ध

वैरूप्ये देसुख्यत्वात्समुदायप्रसिद्धेर्वा विरोध इति चेन्न प्रयोजनांगत्वेन परिहारात् युगपदुपदिश्यमाने ह्येतत्स्यात्सामर्थ्याल्लवाश्री २८

यणाहि स्यात । प्रयोगस्त्वेकस्मात्तिगार्हपत्योपस्थानवेलायां यत्साधनत्वं वायुगामिंद्र इति क्रियारम्भे श्रूयमाणयोगं वांगीक

त्यथैव तस्यांती इत्यादिविधानकालेनुपपुरवमत्यविरोधः। तस्मान्नाविवाध इत्येवं प्राप्ते ब्रूमः। श्रुतिर्लिंगाद्बलीयसी। कुतः। मंत्रो
यं गार्हपत्यांगं शब्दे नैवाभिधीयते। इंद्रांगत्वं तु सामर्थ्यादिगम्यमनुमीयते। यत्र तु प्रकरणाद्वा सामर्थ्याल्लिंगाद्वानुमानेनुक्त
तत्त्वद्वैनाशं स्पष्टमीदृशेष्वर्थेषु प्रमाणमित्युक्तं। परस्तु सार्द्धं विकमेव लिंगस्याशक्तत्वमिति मन्यमानो न तर्हि विरोधाद्बाधः
किं तर्ह्यप्रमाणत्वादेवेति विवक्षन्नुपपद्येवमित्याह। सिद्धांतवादी तु यथा प्रथमे पूर्वपक्षवादिना लिंगस्याप्रामाण्यमुक्तमाक्षि
प्य इदानीं स्वयं प्रतिपादयति। भवति हि प्रकरणादेर्योर्थोयस्या अनुपपत्त्या यागस्यानेनोपकुर्यादिति। न च स्वार्थालिधा
नास्यन्यथाशक्तो सा कुपहंतुमिति तत्र विनियोगश्रुत्येति भवति। परस्तु मदीयमेवापूर्वोक्तं मार्गमायातः। इदानीं ग
मिष्यतीत्युत्साहेनाह। यदि श्रुतिमूलो न श्रुत्यंतरेण वाधितुं शक्यस्तेन यदितावदशाब्दो ग्रमर्थस्तेनैव प्रमाणं। अथवा
दृष्टस्तत्तुल्यकल्पनेति। सिद्धांतवादी तु द्वयमपि परिहरति नापीति। आनुमानिकाः श्रुतेरविरोधे सत्यात्मलाभो विरोधे चानु
त्पादात्तत्र हि प्रत्यक्षया श्रुत्या मंत्रो न विनियोगं प्रति निराकांक्षीकृतस्तत्रास्य विनियोगमिथ्यार्थ्या वक्कल्प्यते।। सर्वमा
म्नानान्यथानुपपत्तिसिद्धा श्रुतिर्वाध्येदिकं भवति। यत्र विस्पष्टमेवावगतमनेन गार्हपत्य उपस्थेय इति। तत्राम्नानप्रयोज

नेत्तत्साध्येचयगोपकारेविज्ञातेनैतावत्कल्प्यमानंवेदःमहतेःनैन्द्रोपस्थानंकर्त्तव्यमिति।तस्मात्तद्दुर्बलंलिंगं।किंच।
सर्व्वत्रैवविकल्पानामेतत्प्राप्यचमवस्थितं।पूर्व्वेद्विसदसद्भावावेकत्रार्थेद्वेराश्रयौ।एवंतंचयाश्रुत्यानित्यमेवगार्हपत्यो
पस्थानेचोदितं।लिंगेनश्रुतंतत्रेणेन्द्रोपस्थानेतत्रान्यतराश्रयणेसतीतरच्चोदितंमन्त्रक्रियेततद्पेक्षयावेतरच्चोदितं।
मन्त्रत्तांतत्प्रकरणमप्यचोदितं - - - - - - - - - श्रुत्याहाच्यश्रुतकल्पनयोश्चअल्पोदोषःप्रसिद्धिबाधाच्चो
दितस्यकर्त्तव्यता।प्रसिद्धिरितरस्याकर्त्तव्यत्वंतदुत्तयमप्यतिक्रम्येति।तस्मान्नात्रविकल्पः।यस्तुविरोधपरिहारार्थं
समुच्चयोभिहितस्तत्रब्रूमोऽस्त्येवविरोधः।कथं।श्रुत्यासत्रनिराकांक्षेमंत्रप्रकरणोपक्रान्ते।लिंगंसाकांक्षमाध्यार्थंतयैवकां
ताहिलक्ष्यते।एकोऽयंमंत्रएकैवचप्रकरणांसकृदुच्चारितस्यैकरूप्येणात्मविलव्यं।तत्रश्रुतिविनियोगवेलायांमंत्रप्रकर
णेनोर्न्निराकांक्षत्वंतवेकदानवातद्यदितावत्प्राप्तिततोविनियोगएवासिद्धोनहिविनियुक्तस्याकांक्षायुज्यते।अथतत्क्षितत
श्राकांक्षाधीनसिद्धित्वाल्लैंगिकविनियोगानुपपत्तिर्युगपद्वलावाधश्रयणोस्पृष्ट्याकांक्षानाश्चियेतिविप्रतिषिद्धंस्यात्।ए
वंसत्यपितुपदिप्रमाणयोस्तुल्यप्रवृत्तित्वंसवेत्ततोविशेषाग्रहणान्नज्ञायेतेकेनप्रथमतरंनिराकांक्षीकृतमिति।युगपदे २९

वोमाभ्यां निराकांक्षीक्रियमाणात्तलया र्थो लवेत्। अग्निवृष्यमाणयोर्विशेषः श्रुतेः श्री घृतस्य हविष्ट्वादतस्यया विनियु
क्तेन मंत्रलिंगस्यावकाशो स्तीति श्रुतिवलीयस्त्वं सिद्धिः। मैत्रेणापस्तो र्वल्येस्तू चित्तेस्मतिलाष्यकत्वा श्र्यार्थे पूर्ववलीयस्त्वं
व्यावर्षेतत्दनादरात्। लिंगवाक्ययोर्विरोध एकंतावदिदं सुदाहरणं। ज्योतिष्टोमे होतृप्रवचनाधीताः प्रैषाः श्राव्याः कोनम
त्रावरुणस्याभिधीयंते। तस्मान्मैत्रावरुणः प्रेष्यति चानुचाहेति। तेषां मध्ये कश्चित्प्रैष एवमंत्रः पठ्यते। प्रशास्तर्यजेति। सोयं
स्वसामर्थ्येन मैत्रावरुणं निदृक्ते। तत्रपदिवाक्यं वलीयस्त्वं ततो मैत्रावरुणः प्रेष्यत्वात्तन्निचप्रैषासंतवा होता यजेदथवु
लिंगं वलीयस्त्वत्तो मंत्रेण मैत्रावरुणो नियोक्तव्यः न चात्मनैवात्मानं नियोक्तुमर्हतीति परेणानियोक्तव्यः प्रसक्ते तेषां यतो
विशेषः स्यादित्येवं। होता विज्ञायते। सामाख्यसमाख्यया पूर्वमर्थं होतुरेव प्रापितः समाख्या को न वाधितश्च सा मीत्वस्य दावा
क्यं लिंगेन वाध्यते। तदा समाख्ययैव प्रतिपन्नतया होतृकर्तृकत्वं विज्ञायते प्रैषार्थकारी तु मैत्रावरुणो विज्ञायत एव।
यद्यपि तस्मान्मैत्रावरुणः इत्येतद्ब्राह्मणं तथापि पदसंनिधिमात्रात्मकत्वेनाश्रुतित्वात्तस्यास्तत्र श्रुतिकल्पनेन लिंग
न वाध्यते। यदि हि मैत्रावरुणः प्रेष्येत्तत्प्रशास्तृशब्दो होतर्यनर्थकः स्यात्। ननु च मैत्रावरुणे विप्रेष्यमाणे होतायज्ञ

३ शाबा द्रियादिरेवार्थश्रुतः स्यात्॥ गौण इति चेन्न प्रशाखशब्दे एवं प्रसंगादपि च प्रशाखान्तत्वादुपजातविरोधः प्रशाखशब्द एव
वसंगो गौणो न प्रथमो ज्ञायिति विनैव विरोधेन होतृशब्दः तस्माल्लिंगयोरेवं प्रविरोधे न लिंगवाक्ययोरिति। अत्र ब्रूमः। सर्वथा
३० वाक्यनयोरन्यतरस्य विरोधे गौणत्वं कल्पनीयं तत्र प्रशाखशब्दस्य होतर्यत्यंतमविनियोगः प्रयोगो होतृशब्दस्य ज्ञेयो तत्का
र्यप्रश्ने मैत्रावरुणोऽस्ति निमित्तं सर्व एव तत्र ध्वानत्विग्वचना होतृशब्दं प्रयुज्यमाना दृष्टा न तु विपर्ययः तस्मात्प्रशाखलिं
गत्वात् मंत्रं समेव नियुंजीत। न चैतद्वाक्यमत्यंतमनर्थकमेव स्यात् प्रशाखांतरेषु चरितार्थत्वात् दत्तो ह्यस्मिन् विषये वा ध्यते ति
॥ स्योनं ते सदनं कृणोमीत्यत्रोदाहरणो बोध्यते। भिन्ने एते यतो वाक्ये ड्वारस्वात्प्रतिपादिते। तस्मात्समुदायो यं वाक्ये
न विनियुज्यते सत्यपि विभज्यमाना साकांक्षत्वेऽर्थत्वेदा हि भिन्नवाक्यत्वमेतेऽस्मात्त्स्तूदाहृते। तस्मान्न समुदायस्यैव सम
र्पना तिधारणेषु पुरोडाशप्रतिष्ठापने च समुच्चये न विकल्पेन वा विनियोग इत्याशंक्य कितव्यः। तत्र केचिदाहुः एते वा उत्सर्ग
न त्वेन वाक्येन सहविचारः। किं तर्हि सदो नेवमहार्थवासाकांक्षावयवत्वेन प्राप्ये एषैकवाक्यता॥ सिद्धा लिंगवली यस्यात्स ३०
युक्ता भिन्नवाक्यता॥ तस्मिन्सीदेत्येतत्कृतंसाकांक्षत्वमाश्रित्यैकवाक्यत्वेनोदाहृतम्। मिदमेव प्रधानं कारणं शक्यते हि

तद्रूपेणान्वये दृष्टं विशेषणविशेष्यभावं कल्पयित्वैकार्थत्वेऽनेकवाक्यत्वं कल्पयितुं तद्युक्तं पूर्वस्य तावदुत्तरेण सह यद
हं घृतस्य धारया सुसुखं तव सदनं कल्पयामीति तस्मिन्नेवमितिकर्त्तव्यताके प्रतितिष्ठामृत इति कर्त्तव्यताविशिष्टपुरोडा
शप्रतिष्ठापनमेकं प्रयोजनं। अथवा पुरोडाशप्रतिष्ठापनफलं सदनाभिधारणं कर्तुं वृणोमीत्येवं विशिष्टफलसदनक
रणप्रकाशनप्रयोजनमिति शक्यमेकवाक्यत्वं। यच्च पुरस्तादर्थनानात्वान्नानावाक्यत्वमुक्तं। तदिह स्थितं लिंगबलीयस्त्वे
न। यदि हि लिंगं बलीयः ततः संभवदन्यतरविशेषणत्वेनैकवाक्यत्वं परित्यज्योभयोः प्रत्येकं स्वप्राधान्यं लिंगानुगतमा
श्रित्य विशेषणत्वादितिरस्कारेण प्रयोजनभेदाद्वाक्यभेदो भवति। तेनायं विनियोगद्वारेण वाक्याद्बलात्तस्य लिंगस्य ब
लाबलविचारः। तत्रापि प्रतीतितो लक्षात्मके वाक्येऽस्ति बाधकप्रत्ययमदसद्भावविचार इति द्रष्टव्यं। किंसाधं तुल्यब
ले इति। तदा वेदृशं कर्म कदाचिल्लिंगमंत्रोपयोक्तव्यो कदाचित्समुदायोच्यतरथक दाचित्त एवोभयत्रेति। कथं पुनर
यमित्थमनवस्थितः शास्त्रार्थो भवति॥ सर्वथा यदि प्रमाणत्त एवमवगच्छते किं नो बाध्यते लिंगवाक्यतुल्यत्वालोचनेन स
र्वमेतत्समत्तिलाति। यदा तु श्रुतिवल्लिंगात्प्रमाणांतरत्वाद्वाक्यमेव बाधकमित्यवधार्यते। तदा नियतत एव समुदायप्रयोगः

उ॰ त्वार्दि॰ इत्येवं शाब्दे भूमःस्यो नादिःकल्पयाग्यं तत्स्वसामर्थ्येन शक्यते। निराकांक्षं हि कार्यायस्या कांक्षत्वं पराश्रयं। सर्वस्यावद
त्रिंत्रावस्यविनियोगं निमित्तते। तदिह कल्प्यामं तस्यनकदाचित्स्यापेक्षा इष्य तस्तिन्ता वति पर्यवसाने निश्चितत्वप्रयोजना
३१ कांक्षा निवृत्तेः बलिधारणां गत्वेना श्रीयते तेनैव तावत्यात्ति घ्रापनया वश्यकत्वा चिन्नायते। नचपरस्यैते नविनानर्थकत्वो पत्तिर्म
त सुहृद्येन नीयेत सोपि हि प्रति स्थापनांगत्वेनार्थवाद्वलविघातियद्यपिच तच्छब्दः पूर्वापेक्षः स्याप्युक्तार्थितं निर्देशं वै शेद्य
दाकृत्यार्थमालोच्यासिद्वस्यापि पदवत्वमानस्य नकश्चिद्विरोधः तदुद्यात स्यपयासिद्धव्यानयती। ति संस्कारविधाने पर्यवसितेमावे
शब्दैच्या। मित्रेति वा कयांतरेणावइय्य देवता संबंधः क्रियते। तस्मा ब्देन विनियोगस्य प्रत्या सन्नतर श्रुतित्वा त्वेत्तरे तरविषयसं
क्रामेविधत्ते।। एवसुपस्करणेन सिमिसंदेहस्य नास्ति सामर्थ्यमिति। पूर्वेणैव गतार्थत्वाय मत्रिरूपणादाद्यार्थ पुनः प्रश्नमय
ते। तेयत्रैकचोक्तं तस्यै तरत्रासावदर्शयित्वा पुनरात्मधर्म्मसुपनीयेतरधर्म्मनिराकरणमितियो निराकुलीकर्त्तुं पः श्र
त्वंप्रत्यप्रस्तावः प्रमाणमस्य सङ्गावात्यांमध्यमः शक्यश क्लिरयामेत्पस्थहेत्वर्थवा भ्यामिति विवेकः। तस्माद्वाक्याल्लिंगं बल ३१
य इति सिद्धं। किंचनः प्रकरणानामेति। सर्वत्र सिद्धवत्प्रकरणेन व्यवहारो नचैतत्क्वचिन्निरूपितपूर्वं तदिहापिता वदस्य

स्वरूपं निरूपयतां निर्वर्त्तितं स्वरूपस्य द्विबलाबलं अखवं ज्ञायते तत्पश्चवा नैवास्यवात्क्रमात्यालेदः॥ साकांक्षपदसंनिधिमा
त्रंहि वाक्यमित्युच्यते। तच्च प्रकरणेप्यविशिष्टं॥ न च वाक्यस्य पदेयत्तायां प्रमाणमस्ति। विलंब्यमानसाकांक्षसंहृत्पम
नेकप्रयोजनमात्रोपलक्षणात्वादेन वाक्यमेवैकमल्पपदं अपरं बहुपदमवांतरार्थं प्रोक्तानां महाप्रयोजनवशेन
महासंबंधात्तापशेवद्दर्शतिवाक्यं सैकं दर्शपूर्णमासाख्यां सह धर्माणामिति॥ अथवासंनिध्यात्मकः क्रमः स उच्यते स च प्र
करणेप्यवश्यंभावी संनिधिरतः क्रमादप्यति नेवं प्रकरणमिति। मन्यते। तदिदानीं तत्वतेदपर्यायैर्निरूपयति। तत्र तत्वेताव
दुच्यते। कर्त्तव्यस्येति कर्त्तव्यताकांक्षस्य वचनं प्रकरणमिति। कर्त्तव्यमिति साध्यमुक्तमपूर्वमथवा विधेयतयोद्देश्यत्वा
न्यां नावगच्छ पत्रयवाभ्यो विधीयते। साध्यांसोपनियताखर्गादिफलं कर्त्तव्यमिति चेन्न॥ न तस्य कालांतरसाध्यत्वेन प्र
योगासंभवात् फलत्वे सति तत्रापि अर्थापूर्वस्यैव कर्त्तव्यत्वावधारणात्तेनापूर्वं कर्त्तव्यत्वान्नान्यथा। तथा यजेत कर्मप्रधानं तद्धि वि
दिनाश्रुतमिति तस्यैव प्रयोजनकत्वं वक्ष्यते। फलदेवतयोश्चास्य तदुपपन्नस्य निराकरिष्यते। तच्च कथमित्यनुग्रहोपायाकांक्ष
णामाकांक्षतीति तच्चैतं व्याख्यायते। यद्धेति कर्त्तव्यतामाकांक्षतीति कर्त्तव्यताकांक्षं लावापूर्वयोरेवैकं तस्य पद्ध

३ शा॰वा॰ नमिति। समानाधिकरणे ष्यंते। क्वचनमिति शब्देन प्रत्यायनमेतदुक्तं भवति। यत्करूपेण विद्यमानाप्याकांक्षा न
३२ करणमित्यभिधीयते किं तर्हि प्रतीयमाना सापि च कर्त्तव्यतार्थोपसर्जनत्वेन गृह्यमाणा नस्वातंत्र्येण तेनाकांक्षाभि
धीयमाना प्रकरणमाकांक्षावती वा भावनेति द्रष्टव्यं। इदानीमवयवव्युत्पत्त्यात्मकेन भेदेन कथयति। तत्रेदं शब्द ६२
वक्तव्यं भमाह करणशब्दः क्रिया। प्रकरणं प्रक्रियेत्यर्थः काऽसौ नेह क्रियाभ्युपगतेत्याह वचनक्रियायाथी विधान
क्रियायाश्चेति यावद्भावना विधानक्रियापि हि प्रयोगवाक्यप्रवृत्तिरात्वं लः फलकरणं शब्दनं पदद्वयमात्रसाध्य
मितिकर्त्तव्यताल्लक्षणेनैकवाक्यं। तत्रापि सिद्धिर्हेतुसमभ्याजोचनापेक्षया कथं भावः प्रकरणमभिधानविधानक्रि
ययोरात्मलाभस्तु यतः करणशब्दस्तु क्रियामात्रवाच्यपि सन्नागमविषयः प्रयुज्यमानो विधानविधानक्रियायां वर्त्तते। वृ
त्तिसमर्थ्यमूलत्वविध्यादिरिति पर्यायकथनं। अथैतयोः संबंधविशिष्टत्वात् किमपेक्षादित्वमित्यत आह विध्यत्तापेक्षा इति
विध्येतानामतद्भावरूपमिति कर्त्तव्यतावधारणं। तस्य चानेकाङ्गवाक्यतदर्थतत्प्रयोजनालोचनमध्यस्य कथंभावश्रा ३२
दिरित्याचार्याणां विध्यादित्वेन प्रसिद्धिः। तत्र च सर्वपदगणेन कियत्यपि प्रयोजनेवसितानामेववाक्यानांकाङ्क्षः कार्यातत्र
त५

पेक्षावशेन संबंध इति वाक्याद्विशेषः। तच्चादितः क्वचिदपि प्रयोजनलेशे क्लिश्यमानानां बुद्धिर्न्नास्तीति संबंधे नैवार्थला
तः। क्रमेणानु सहवैलक्षण्यमनंतरमेव वक्ष्यामः। तत्रात्मप्रमाणांतरं प्रकरणं। किमिहोदाहरणमिति। तेनैवैकवाक्यतानय
नातिप्रायेण श्रुतिः। सिद्धांतवादिनु विधायकस्याकरत्वेन तिन्नष्टत्तिवान्मेचब्राह्मणेपार्न कथं चिदेकवाक्यताद्वष्टत्व इति
सूक्तवाकमुदाहरंतीति लिंगादेवतापदेषु निःकृष्टेषु तद्धेमाः किंतु तत्क्रियत्तं अथ तद्विहिताश्चापि प्रयुज्यतामिति। प्रकरणेन
तावत्सर्वशेषत्वमपद्वयाप्तावेतिलिंगमपि साधारणं। द्विवचनैकवचनयोरुभयत्र विधमानार्थत्वाद्व्याप्तमुचितमीयेनैवशे
षेणाश्रुतदेवतापदेषु अंतरमनवकाशमेव स्यात्। सत्यमेवमपि तु वाक्यप्रकरणयोर्विरोधो नैवायेति प्रकरणेन
ह्यपनीतदेवताको विशेषः प्रयोज्यः प्राप्नोतीति वाक्येन तु यथादेवतायथा तु सारास्मकृदिति विरोधः। क्वचित्संबंधत्वाच्चवा
क्यवलीयः कथं तावेन हीज्यजेतेति प्रकरणिना सह संबंधमनुमायप्रावदाभात्तशेषप्रयोगः तथा स्वशेषेरात्मीयैर्देव
तापदैः सहैव नः संबंधकल्पनमिति विप्रकर्षः स्यात्स्याद्बाधः तत तत्र देवताशेषाणां नित्यमेवापकर्षोत्पाद्धिकः सर्वदा वाः
विनियोग इति सिद्धं। अथ क्रमप्रकरणयोर्विरोधे किमुदाहरणमिति। यथा संख्यक्रमलक्षणविरोधोदाहरणासंभवात्तु
नेतरदितिवाक्यबली स्यादेवतादाश्रयाणां। अस्य सकृद्वा प्रकरणेनतावद्वयप्रयोगः प्राप्नोतीति वाक्ये

उशा॰वा॰
३३

रभ्यात्तु स्माद्वाम्नातस्य सं निष्फलत्वेनावांतरप्रकरणे न प्राप्ते नैव किंचिदुदाहरणमिति विपर्ययस्तत्त्वेनाज्ञानसंशयावतिक्र
मात्प्रश्नः शक्यं त्विहावांतरप्रकरणत्वप्रसंगनिराकरणमित्यतिशेषोदाहरणोपन्यासः राजसूयप्रकरणेऽभिषेचनीयस्यो
पदिशेनः शेषमाख्यापयति राजन्यं जिनाति पष्ठौहीं दीव्यति। अभिषिच्यतइत्येवमादीन्याम्नायंते तेषां चांगत्वे नैव कस्य
चित्संदेहः विप्रतिपत्तिर्वेति शेषविशेषसंबंधनिश्चयार्थमिदं विचार्यते किं सामस्त्येन राजसूयस्यैतान्यंगान्युताभिषेचनीयस्यैवा
थ विकल्पः समुच्चयपक्षासंभवादिति। प्रकरणस्य क्रमस्य च बलाबलादेतद्विज्ञातव्यं। ननु चाभिषेचनीयस्यावांतरप्रक
रणत्वप्राप्तिरिति मतः प्रकरणं बाध्यते नैष दोषः प्रयत्ननिराकांक्षीकृतेऽभिषेचनीये तेषां पाठः स्यात्ततोवांतरप्रकरणमवग
म्यते॥ स तु प्रागेव विदेवनादिरूपः प्राकृतैर्धर्मैर्निराकांक्षीकृतः सत्यामपि श्रुत्यासन्नावरुध्योपकारानेतानुपकारोऽयं प्र
ऽकृतुत्वं प्रकृतिमपेक्षते। तथा च ये गोपकारप्रदादानेन पूरितेकथंभावे निवृत्तं प्रकरणं समीपाम्नातधर्मानर्थकाप
त्तिभयादेव वचनकल्पनापेक्षातः क्रमत्वं भवति निराकांक्षस्य हि सतः आकांक्षा यावदभिषेचनीयस्योत्पादवेन्नावद्राजसू
यकथंभावेन प्रत्यक्षेण सिद्धो हि नियोगः तदीयो हि कथंभावः पवित्रादारभ्य क्षत्रस्य धृतिं यावदन्तु शक्नोति विदेव ३३

नादीनि संस्पृष्टं ॥ अतो नास्यावांतरप्रकरणमभिषेचनीयस्याय स्यां ३ विकृतौ प्राकृतं किंचिदंगं संकीर्त्यते तस्य पुरस्तात्
रस्ताद्वा वैकृतमंगमाम्नायते तत्र कथं लावगृहीतानाम मध्यवर्त्तित्वात्सकरणपाठो विज्ञास्यते। तद्वेन मध्यपतितक्रमस्यैव
व्यापारः। संनिधावाम्नाते न च पूर्णानापीति॥ वा कार्थपूर्णत्वातिपृथम नेकस्याम्नायमानस्य संनिधिविशेषाम्नानमा
त्रं हि क्रमस्यैव व्यापार इति केनचित्संनिधानस्य नांतरीकत्वं दर्शयति। यो हि वहूनामर्थेनाम्नायते तस्य सर्वप्रधान।
प्रत्यासन्नप्रदेशासंभवादवशेषता विनीकेन न क्वचित्सह पत्यासत्तिः। न तु प्रकरणपाठस्यैवं नांतरीयकत्वमतः सहपठितये
ः क्रमप्रकरणयोः प्रकरणस्य शीघ्रतरं श्रुत्यर्थप्राप्तिरिति केनलीयस्त्वा क्रमसमाख्ययोर्विरोधे किमुदाहरणमित्यत्राप्य
ज्ञानसंशयकृतो प्रश्नानंतरयोगिकत्वात्समाख्यायाः श्रुतिवच्छीघ्रं संबंधहेतुत्वमिति वलीयस्त्वं मन्यमानस्य विपर्ययभ्रम
नेः प्रश्नः पौरोडाशिकमिति समभ्युदर्शपूर्णमासकांडमभिधीयते। तत्र समाम्नायपाठः शुंधध्वं न क्रमे शुंधध्वमिति मंत्रः प
ठितः स च प्रकरणाल्लिंगाच्च दार्शपौर्णमासिकपात्रशुंधनार्थ इति सामाख्येनावधारिते तद्विशेषजिज्ञासायां संदिहाने
। किं समाख्यया पुरोडाशपात्रार्थो लवत्वथ क्रमेण सान्नाय्यपात्रार्थ इति। यतरद्बलीयस्तेन विनियोज्यते बलाबलत्वा

ऋशावा। द्विकल्पो विरोधालाबाद्वा समुच्चयः। क्रमस्य च दृष्टबाधस्य संबन्धाजनितिधायिनश्चादृष्टबाधया संबन्धातिधायिन्याश्च स
३५ मारव्यया बाधः इति प्राप्ते। अर्थविप्रकर्षः समाख्याबाध्यत इति ब्रूमः। तथा हि। वैदिके देशसामान्ये प्रत्यक्षं दृश्यते क्रमे
(समाख्यायां तु सामान्यं कल्प्यत्वाद्विप्रकृष्यते। कः पुनरत्रार्थविप्रकर्ष इति समाख्यायामेतज्ज्ञातसंबन्धसंबन्धाभि
धायित्वान्न संभवतीति मन्यते। (निर्ज्ञाते प्रकरणे नु केनापि सहैकवाक्यत्वे इति। प्रकरणाविरोधिनं क्रमविनियोगं
केवलं समाख्याजातियोगित्वेन वदर्शयति। कथं पुनः प्रकरणेन विरुध्यते यदा तेन सर्वार्थत्वं ज्ञायमानमुपक्र
मवशेन केवलसान्नाय्यार्थत्वं विज्ञायते। नैष दोषः। यदि हि प्रकृतेव यं क्रमविनियोगमभ्युपगमेच्छेत तत एवं स्यादिह
तु प्रकरणेन दर्शपूर्णमासान्यतरार्थत्वे वधारिते तद्विशेषाकाङ्क्षायां केवल एव क्रमो व्याप्रियत इत्यविरोधः। ननु
सर्वार्थत्वं नावधारणायतः कृतश्चिदपि निवृत्तो प्रकरणाबाध्येते। न चावश्यं सर्वार्थत्वं प्रकरणेनावधार्यते मन्त्रस्ये
केनापि संबन्धकृतार्थत्वात्प्रकरणिनां च मन्त्रान्तरैरप्यर्थसिद्धेः सामान्यविनियोगश्रुतिमात्रमेवेह क्रमात्पूर्वं वर्त ३५
ते निःपद्यते तत्र यावद्विशेषश्रुतिमेकैकं घटितिकल्पयति। तावत्क्रमेणापि कल्पितैवेति प्राकरणिकी विशेषश्रुतिर्बुद्धि

रूपसंक्लिप्यते। समाख्या पुनः क्रमविपरीतार्थत्वाद्धि रूप्यते। विप्रकर्षाच्च दुर्बला। सर्वो हि संबंधः केनचिदवांतरमा
मान्येन भवति न च मे उपुरोडाशयोः संबंधे रूपं किंचिद्दृष्टं। यथा सांनाय्येन समहदेशसामार्थ्यं। लौकिकस्तु शब्दः समा
ख्येति तन्त्रज्ञानुवाके परिहृतमपि सद्वैदिकसंबंधविप्रकर्षार्थमुपन्यस्यते परमुलिंगनिराकरणोक्तेनैव मार्गेण स्थूलोक्त
र्त्तेनैव समाख्यां निराकृतां मन्यमान आह यद्येवमित्यादि। सिद्धांतवादी तु तन्त्रज्ञानुवाक्योक्तमेवोत्तरं दर्शयति। यदि
हौत्रं गांगिलावौद्गात्रं पुरुषप्रत्ययाद्भवेत्॥ तत्तु स्यादप्रमाणत्वं सत्सु वैदिकएक्नः। पौरोडाशिकशब्दो मे च ब्राह्मणयोरपौ
नत्वादवैदिकोनां गागिलादः सच शब्दस्यावैदिकत्वेपि ब्राह्मणादिसंबंधत्वाद्विद्यमानस्मृतिमूलत्वाच्च पुरोडाशशब्दो।
स्य वाचक इति नैतद्गौडीयं शब्दार्थव्यवहारिणां हृन्नादिष्विव प्रत्यक्षत्वात्संभवति हि सर्वेषां मध्यतदुपलब्धस्य प्रयोगः
तु दर्शयति भवति वास्मिन्नर्थे ऽपरूपः प्रमाणं यथा सान्नाय्यक्रमआम्नाने प्रकरणमेकवाक्यत्वं वेदशब्दश्चार्यमिति स
र्वत्र हि पुरुषांतरस्य दर्शनपूर्विका पुरुषांतराणां प्रवृत्तिः समानदेशाम्नाने प्रकरणपाठपादानां परस्परसंनिधिसंबंधे
या न वेदो वदति। किंतर्हि पुरुषेष्वामलस्मृतेर्थाद्दृश्यते तेरप्येवमन्येभ्यो दृष्टमित्यनादित्वेपि सर्वेषां दर्शनसंभवात्। अथ

कै २

शा·दी परंपरान्याये निरस्ते सति प्रामाण्यं अन्यथा हि वेदावेदप्रकरणाप्रकरणादीन्यप्रमाणकान्येव भवेयुरनेकधार।
स्थत्वाज्ज्ञानान्तरस्यापि चित्वात्तदर्थं यद्दोषाशंका स्यात्। तस्मात्स्वत एवाद्यप्रामाण्ये ऽर्थे किंचित्कर्षादत्र बाधस्तु चोक्तः ॥
३५ त्रव्याख्यायां। एवमेतेषां यथालाभमवस्थितानां श्रुत्यादीनां विरोधे श्रुतिर्नित्यं समाख्या बाध्यते सदा। मध्यमानां तु
माध्यत्वं बाधकत्वं व्यपेक्षया ॥ ॥ इदानीं बाधस्य स्वरूपमाक्षेपद्वारेण कथयति यत्तच्च तत्रोच्यते द्वयोर्द्वयोर्विरोध
इदमनेन बाध्यते इदमनेनेति। श्रुत्या लिंगं लिंगेन वाक्यमित्यादि। तद्बाधकविषयं प्रसंगं बाध्ये तावत्प्रसंगं वा तयदितो वद
प्राप्तं ततः समवाय एव नास्तीति किं बाध्यते। समवायसिद्ध्यर्थं त्वप्रसंगं बाध्यते तत्र तयोरपि प्रमेयत्वात्तुल्यकत्वं वा प्रि श्री
ति। न बाधकस्य प्रामाण्यं। तच्चोत्तरे सामान्यकारणत्वात्सर्वबाधकगोचरं बाधके न बलीयस्त्वान्यथेति कल्प्यते।
यथैव मृगतृष्णादिज्ञानान्यप्रमाणानि मिथ्यात्वकल्पनया बाध्यं तेषां नोपादानादिफलवियोगाद्बाधव्यपदेशं लभं
ते तथा लिंगादिज्ञानमप्युत्पन्नं श्रुत्यादिज्ञानेनानुष्ठानरूपात्फलाद्विप्रच्छ्यमानं बाध्यते न त्वेतद्युपपद्यते। कुतः ॥ ३५
बाधस्योक्तप्रकारत्वात्प्रसक्तावर्ज्यते। द्वितेचाप्राप्तबाधे प्राप्तबाधोऽपि नोत्तरं। तज्जनाम प्रसक्तो भवति। यत्नस्य मंत्रो

ता २

त १

क्तं एतानि च लिंगादीन्यर्थविप्रकर्षादननुमितश्रुतीनि बाध्यंत इति सत्त्वाच्चेन्नैवप्रश्नमर्हति ॥ यद्यपि चरमं ध्यंते ॥ तथाप्य
प्रसिद्धौ तेन नोत्तरेषां तव्यमननुमितश्रुतिबाधेन तत्क्रमबाधः स्थितमिदानीं प्राप्तबाधोपवर्णनेन प्रसिद्धिः येन विनोपप
न्नाः ॥ यद्युच्यते मामाच्यस्यकारणस्यविद्यमानत्वादिति तल्लिंगादीनां माहात्म्यमाणत्वालत्वाच्यमा ॥ न्नतायाश्च श्रुतेरवि
द्यमानत्वादनुपपन्नामथ तु तामनुमायशापि क्षिप्यते ॥ ततो बद्धात्मकत्वादानुमानिक्याः श्रुतेः सत्यज्ञायाश्च न कश्चिद्विशेषइ
ति तुल्यबलत्वमेव प्राप्नोति ॥ यदि वा मिथ्यात्वकल्पनरूपबाधाभ्युपगमाद्विरोधे सति तत्कल्पनाद्विपरीतबाधप्रसंगः ॥ कथं
पूर्वपूरमजातत्वाद्बाधित्वे वजायते ॥ परस्मान्न च श्रोत्यादीनं तद्बाधेन संभवः ॥ श्रुत्यादौ शीघ्रतरत्वात् प्रथमं प्रवृत्ते लिंगादीनां
प्रवर्तते तत्र च दिशामबाधसिद्ध्यर्थं पश्चात्प्रवर्तमानमपि लिंगं श्रुतिमनुमापयति तत्र स्मात्तुल्यविषयसंनिविष्टां पूर्वीमबाधि
त्वा नात्मामांलनते इति सुगच्छादि छिवमिथ्यात्वं कल्पयंत्येव जायमाना बाधिका स्यात् ॥ तस्मान्नैव श्रुत्यादिषु गंधो द्वतइ
ति ॥ प्रथमाधिकरणांतोपसंहारान्न विषयः प्रतिलाति ॥ तथापि सामर्थ्यात्पूर्णाद्यनुमेत्त्रत्वादुच्यते विजातप्रकारत्वान्नेवाया
समयमन्त्रतत्र श्रुत्यादिषु बाधः संबध्यते किं तर्हि बाधाधिकारादिहाचार्यस्यायाकृतः शाब्दोपनिबद्धा वर्तते दान्तेसर्वेद्वस्यम

धा २

रुशा·वा· नुग्राह्याः। तेषां च न श्रुत्यादिसहशीवाधउपपद्यते। सर्वत्र वैकरूप्येणा वाधमार्गेणानवितत्वं। अन्तोयदि वा तदीयः प्रकारः श्रु
३६ त्यादिषु स्फुटः श्रुत्यादिप्रकारो वा तेषु न श्रुत्यादिगतस्य भावस्तस्य संप्रत्येव कथितत्वादिति किं तेन पृष्टेन। ये त्वेते द्वीति विक्लाः स्वेषु कथमि
ति मन्यमानो वदति। अथ यत्र तत्रोक्त तदुद्दमनेन बाध्यते। प्रत्यक्षेणानुमानं श्रुत्या लिङ्गादि प्रत्यक्षाश्च यथा स्वंपरिग्रहे पिप्रमाणो
ः प्रमाणा तासां श्रुत्या स्मृतिरामादिविरोधे तत्स्मृत्यानां प्रविरोधे तत्स्मृतिः। स्वदृष्टार्थयाजे दृष्टार्थी श्रुति प्रबलवत्या लिंगादि प्रबलवा
र्थवाद प्रबलवा द॥ स्मृत्याप्याचारः। सोप्यनिपुक्तत्ताचारेण। संदिग्धमसंदिग्धेन दुर्बलाप्रयत्नं बलवता श्रयेण उपसंहा
रस्थं उपक्रमस्थेन। अत्यंतादृष्टार्थं नियमादृष्टार्थेन। आराडुपकारकत्वं सामवायिकत्वेन। अनेकार्थविधानमेकार्थविधाने
नानेकशब्दार्थत्वमेकशब्दार्थत्वेन बहुधाल्पो धाल्प बाधेन वेदांतरोत्पन्नं वेदांतरविहितत्वेन पशाखाविहितं स्वशाखाविहि
तेनानित्यं नैमित्तिकेन। द्विःप्रकारमप्येतत्क्रत्वर्थपुरुषार्थेन। अनारभ्याधीतं प्रकरणाधीतेन। पौर्वापर्यविरोधे पूर्वपरेण
प्राकृतं वैकृतेन। प्रयोगवचनाश्रितं चोदकाप्रयेणानिःप्रयोजनं सप्रयोजनेन। ब्राह्मणक्रमो मंत्रक्रमेण। देवताप्रं
इज्याप्रयेण। पश्चादाम्नातं पूर्वाम्नातेन। अल्पत्वं तपसा। गौणं मुख्येन। सामान्यविहितं विशेषविहितेन सावकाशं निरवका ३६

शेनांगं प्रधानेनांगस्य धर्मः प्रधानधर्मेण तत्सर्वमेव किं प्राप्तं संबाध्यतेऽथ श्रुत्यादिवदेवाप्राप्तमिति। तद्यथा दित्वावत्स्त्रुत्यादिव
